# प्रास्ताविकम्

## महर्षि जैमिनिः (विक्रम पूर्व ३००शके)

ज्योतिषशास्त्रे पाराशरपश्चात् फलित ज्योतिषस्य सूत्रशैल्यां निरूपयिताऽ महर्षिः जैमिनिः कदा कुत्राभवत् ? तद्विषये अद्यावधि पर्यन्तं न किंचित्स्पष्टं प्रमाणमुपलभ्यते । यतो हि ईश्वरवत्स मुनिवरः प्रमाणत्वेन मान्य इति प्रसिद्धं सर्वत्र । किंच श्रीमद्भागवते सामवेदस्योऽयं जैमिनिः इति चतुर्थस्कंधे क्रमश ऋक यजुः सामाथर्ववेद परम्परोल्लेखात् ज्ञायते । सर्वथाऽवलोकनेन ज्ञायते यत् कविवरो यं सामवेद प्रचारको महर्षिः सुमन्तु पुत्रः आसीत् । सुमन्तु सूनुः सुत्वास्तु क्रमशः एकैकां संहितां प्राह ।तस्य शिष्यः सुकर्मा सामवेदस्य महान पण्डितः आसीत् ततो सामवेदस्य प्रचाराय सुकर्मा संहितायाः सहस्रं भेदं प्रतिपादितवान् ।[१]

किंच श्रीमार्कण्डेयपुराणे महर्षि जैमिनेरुल्लेखः व्यासशिष्यत्वेन दृश्यते ।[२] महर्षि व्यासादेव जैमिनिः वेदन्यायमीमांसा ज्योतिषादिकं शास्त्रमधीतवानिति सर्वथा ग्रन्थस्यावलोकनेन ज्ञायते । महाभारत युद्धोपरान्तो एव जैमिनेः कालः निर्णेतुं शक्यते । तथापि पार्थसारथि मिश्र विरचित शास्त्र दीपिकायां युक्तिस्नेह प्रपूर-व्याख्या टीकायां मीमांसाया गुरु शिष्य परम्परया प्रवृत्तिक्रम प्रदर्शने ब्रह्म प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सो ऽप्यग्नये स च वशिष्ठाय सोऽपिपराशराय, पराशरः कृष्णद्वैपायनाय सोऽपिजैमिनये, सोऽपि स्वोपदेशादनन्तरं इमं न्यायं ग्रन्थे निबद्धवान्, इत्युक्तत्वाज्जैमिनेः कृष्ण द्वैपायन शिष्यत्वात्कृष्ण द्वैपायनस्य च स्वनाम्नैव श्रीकृष्णावतार समकालिक सद्भावत्वेन प्रतीयमानत्वाद् श्रीकृष्णस्य द्वापरे रामकृष्णौ च, इत्यभियुक्तोक्तेद्वापर युग प्रभवत्वेन प्रसिद्धत्वात् कलियुगारम्भात्प्राग् द्वापर युग प्रभवत्वेन प्रसिद्धत्वात । कलियुगारम्भात्प्राग् द्वापर युगान्ते यं जैमिनि मुनि रासी दित्यनुमीयते । मीमांसा दर्शन सूत्रकारैर्भगवज्जैमिनिमुनिपादैः आत्रेय, आश्मरथ्य, काठर्णाजिनि बादरि, ऐतिशायन, कामुकायन, लाबुकायन, आलेखनेत्यष्टावन्ये मीमांसाचार्याः संस्मृता परं तेषां कृतिः सम्प्रति नोपलभ्यते ।

एतानातिरिच्य काश कृत्स्न नामको न्यो प्याचार्यः आसीत् । यस्य नाम निर्देशः पतंजलिना स्वकीये महाभाष्ये कृतो वर्तते । 'अनेके बादरायणः, अनेके जैमिनिः' इति के० ए० नीलकंठ शास्त्रि महोदयानां मतं न समीचीनतया प्रतिभाति ।[3]

महर्षिर्जैमिनिः मीमांसा तथा ज्योतिष-फलित सूत्रस्य प्रणेतारः, अस्य सूत्रस्य निर्माणकालः विक्रमाद् पंचशतवर्षेभ्यः प्रागेवनुमीयते ।[4] पातंजलि महाभाष्ये आचार्य काशकृत्स्नस्य नामोल्लेखो दृश्यते । जैमिनेर्पश्चात् शबर स्वामि एव मीमांसा दर्शनस्य महान संरक्षको भवत् । तद्विषये श्रूयते यत् शबर स्वामिनो यं विक्रम संवत्सर प्रवर्तकस्य विक्रमादित्यस्य पितुरासीत् । परन्तु अस्य किंचिदपि ऐतिहासिकं महत्वं नास्ति ।

पंडित वाचस्पति गैरोला महोदयेनां मते कृष्णद्वैपायनस्यापरं नाम पाराशर्यापि आसीत् । तस्माज्ज्ञायते यत् पाराशर्यं पितुर्नाम पाराशर आसीत् अलबेरूनी महोदयेनापि पाराशरपुत्रो यं व्यासः इत्युक्तम् ।तेन स्पष्टेन निरूपयता प्रोक्तं - अयं महामुनिर्व्यासिश्चतुर्धा विभक्तं वेदं चतुरः शिष्यान् अपाठयत् । तत्र ऋक्संहितां, पैलम्, यजुः संहिता वैशम्पायनम्, सामसंहितां जैमिनिम् , अथर्व संहितां च सुमन्तुमपाठयत् । पुराणो पुराणोतिहासयो च सूतं लोमहर्षणं स्वशिष्यम् अकरोत् । असौ लोमहर्षवः अमुठय पुत्र उग्रश्रवाश्चपुराण प्रवचने महान्तौ पटू आस्ताम् । नैमिषारण्यादि तीर्थेषु संगतानां जनानां मध्ये पुराणोतिहास प्रवचनेन इमावेव पितापुत्रौ लोमहर्षणोग्रश्रवसौ वैदिकीं संस्कृतिम् अरक्षताम् ।

महर्षि जैमिनि गुरोर्वेदव्यासोपाधिराय महामुनेः कृष्णद्वैपायनस्य विषये एकमितिवृत्तमपि श्रूयते । असौ वेदव्यासः कदाचिद् अतिपुरातने काले ईरानदेशं गतवान् ।

तत्रत्यो नृपतिः अध्यात्म विद्यानिपुणं योगिवर्यममुं बहु सममानयत् । पारस्य भाषा लिखितेषु तत्रत्येषु प्राचीन पुस्तकेषु 'कंदीपायन इति नाम्ना कृतिः कृष्णद्वैपायनस्यैव । तेन सह महर्षि जैमिन्युल्लेखोऽपि दृश्यते । एवं महाभारत युद्ध काले जैमिनिः विद्यमान आसीद् इति महाभारत ग्रन्थादेव विज्ञायते । अतो महाभारत-युद्धकाल एव महर्षि जैमिनिकालः इति वक्तुं शक्यते । भारतीय विचार-धारानुसारेण महाभारत संग्रामस्य जातस्य प्रायः पंचसहस्राणि वर्षाणि व्यतीतानि ।

# ऋग्वेदः



ऋग्वेदः श्वेतवर्णः स्याद् द्विभुजो रासभाननः ।

अक्षमालाधरः सौम्य प्रीतो व्याख्यानोद्यतः ॥

# यजुर्वेदः



# सामवेदः



निलोत्पलदलाभासः सामवेदो हयाननः ।
अक्षमालान्वितो दक्षे वामे कुम्भधरः स्मृतः ॥

# अथर्ववेदः



अथर्वणाभिधो वेदो धवलो मर्कटाननः ।
अक्षमालाविन्तो वामे दक्षे कुम्भधरः स्मृतः ॥

# निरुक्तम्



इन्दुवर्णनिर्मलं शान्तं बकवक्त्रं कृशोदरम् ।
पाशपङ्कजसंयुक्तं साक्षसूत्रं सपुस्तकम् ॥

# छंदः



जपाकुसुमसङ्काशं छन्दो ज्ञेयं विचक्षणैः ।
चकोरास्यं जपापुष्पं शक्तिं बिभ्रच्छिखान्वितम् ॥

# शिक्षा



शिक्षाशुभ्राऽभयकरा ज्ञानमुद्रा समन्विता ।
अक्षसूत्रा सकुण्डा च द्विभुजा दण्डपङ्कजा ॥

# व्याकरणम्



सितं व्याकरणं ध्येयं मयूराभं सदादरम् ।
वीणाकरान्वितं दिव्यं दिव्यवस्त्रविभूषितम् ॥

# कल्पः



कल्पस्तु कुमुदाभः स्याद्राय सारस्यो महोदरः ।
कुठारदण्डाब्जहस्तो मेखला कुण्डलान्वितः ॥

# ज्योतिषम्



ज्योतिषञ्च बिडालास्यमिन्द्रगोपनिभं शुभम् ।
अक्षसूत्रं जपां बिभ्रद् हस्तयोर्दक्षवामयोः ॥

# पुराणम्





पुराणं चम्पकाभासं शुकवक्त्रं च तुन्दिलम् ।
अक्षसूत्राभयं ज्ञेयं नानाभरणभूषितम् ॥

# चतुःषष्टि कला



हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां,
टङ्कं शुभ्रं कपालं दरममृत लसद्धेमकुम्भ दधानाम् ।
मुक्ता विद्युत्पयोदस्फटिक नवं जपाबन्धुरैः पञ्चवक्त्रा
स्त्र्यक्षै वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि ॥

# धर्मशास्त्रम्





धर्मशास्त्रं सितं शान्तं चारुवक्त्रं कुशासनम् ।
मुक्ताजपाक्षसूत्रं दक्षे तुलाहस्तन्तु वामतः ॥

# मीमांसा





सोमकीर्तिसमाभासं मीमांसाशास्त्रमुत्तमम् ।
अक्षसूत्रं दधद्दक्ते सुधापूर्णं घटं परे ॥

# इतिहासः





इतिहासः कृशाभासः शूकरास्यो महोदरः ।
अक्षसूत्रं घटं बिभ्रत्पङ्कजाभरणान्वितः ॥

# आयुर्वेदः



आयुर्वेदो हरिद्राभो वानरास्यो विशालदृक् ।
अक्षसूत्रं सुधाकुम्भं बिभ्रदारोग्यदो भृशम् ॥

# न्यायशास्त्रम्



अतसी पुष्पसङ्काशी न्यायो ज्ञेयो विपश्चिता ।
सिंहस्थो दक्षिणे सूत्रं ध्वजं वामकरे दधन् ॥



नृत्तशास्त्रमिदं रम्यं मृगवक्त्रं जटाधरम् ।
अक्षसूत्रं त्रिशूलञ्च बिभ्राणं च त्रिलोचनम् ॥

# साङ्ख्यम



साङ्ख्यं तत्कापिलं बभ्रुवक्त्रमुज्ज्वलकुण्डलम् ।
जाप्यदण्डधरं दीर्घनख लोम जटाधरम् ॥

# पातञ्जल योगः



पातञ्जलाभिधं रक्तं सर्पवक्त्र सुतेजसम् ।
अक्षसूत्रं पताकाञ्च दधतं कुण्डलान्वितम् ॥

# धनुर्वेदः



पीतवर्णो धनुर्वेदः पिकवक्त्रो महत्तनुः ।
धनुर्बाणधरो रौद्रो मस्तके कपिला जटाः ॥

प्रस्तुतस्य शोध-प्रबन्धस्य प्रारम्भे कृते सति वैदिक वाङ्मयस्य विवेचनमप्यावश्यकं वर्तते । अथको यं वेदः, किं स्वरूपं तस्य, वेदेकिं किमनिवार्यं दृश्यते, विद्यन्ते, सायन्ते, लभ्यन्ते वा एभिर्धर्मादि पुरुषार्थाः इति वेदाः । इष्टप्राप्ति-अनिष्ट-परिहार पारलौकिकमुपायं यो वेदयति स वेदः इति सायणस्य कृष्णायजुर्वेदीय भाष्यभूमिकायां वर्णितं तत्रैव सायणेन —

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एतं विन्दन्ति वेदेन तस्माद्वेदस्य वेदता ।।[5]

परमाधुनिकभाष्यकारेण स्वामिना दयानन्देनापि स्वकीय ऋग्वेदादिभाष्य भूमिकायां- "विन्दन्ति -जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति सर्वा सत्यविद्या यैर्येषु वा स वेद" इति व्युत्पत्तिः कृतावलोक्यते ।[6] परन्तु तदेवं विद्यानां सर्वासामपि व्युत्पादनानां तात्पर्यं विषयीभूतो र्थः सर्वथा समान मेव । मनुस्मृतेर्मनुना उक्तं "वेदो खिलो धर्ममूलम्"[7] समस्ते वेदे धर्मस्य व्यापकत्वन्मुद्घाटयति । समाजस्ये निर्माणे धर्मस्यैव महत्वपूर्णं स्थानं दृश्यते वैदिकान् सिद्धान्तानवलम्ब्य समाजस्य राष्ट्रस्य च निर्मातारः मन्त्रदृष्टारः ऋषयः एव । मन्त्रदष्टणाम् ऋषीणां मननं, चिंतनं निदिध्यासनमेव धर्मस्य रहस्यमुद्घाटयति तमेव इष्टानिष्ट प्राप्ति निवृत्यर्थं सूक्ष्म निरीक्षणाध्यामुपलभ्यति । किं करणीय मकरणीयं यथायोग्य प्राचार परिज्ञानं व्यवहारज्ञानमपि सूच्यति । स्मृतिवर्णितमाचारपुटिज्ञानमुपदेशादिकं वेदे पि विशदतया सम्यग् रूपेण वर्णितं दृश्यते । किंच पुरुषसूक्ते विश्वोत्पत्ति रहस्यमतीव रमणीयतयोपवर्णितम् । जगदुत्पादकस्येश्वरस्य महिमानं निरूप्य तत एव निखिलोत्पत्तिश्च प्रदर्श्य विविधजीवानां समुद्भवः वर्णव्यवस्थापनं वेदाविर्भावः जीवानांच बन्धनं, ऐहिकोन्नति पुरस्सरं मोक्षमार्गं प्रदर्शनमित्यापिकं सर्वमेव सृष्ट्युपयोगि तत्वजातं निर्दिश्य प्रकृतिनिगूढ़ रहस्यं संग्रहेण प्रपंचितं विभाव्यते ।

वैदिकभाषा संस्कृतभाषायाः बहुप्राचीना भाषा अस्ति । प्राणिनैर्व्यवहृता 'छांदस' एव संस्कृत भाषायाः प्राचीनतमं रूपं सैव संस्कारात् विकासाच्च संस्कृत इत्युच्यते । वैदिक संस्कृतस्य यथा स्वतन्त्रा भाषा दृश्यते तथैव स्वतंत्र नियमैः युक्तं तस्य व्याकरणमपि दृश्यते । व्याकरणवैभिन्यात् सा वैदिकीभाषा प्रतिशाख्य इत्युच्यते ।

प्रत्येकं संस्कृतेः सांस्कृतिक परम्परायाः वा प्रवर्तनं मानवस्यानुभवानाम धारे एव भक्ति भवति । इत्थं च मनुष्यः एव प्रत्येकं संस्कृतेः मूलमस्ति । प्रत्येकं संस्कृते : मूलस्तम्भाः विज्ञानं, दर्शनं धर्मश्च जनिताः वैदिक संस्कृतिष्यल्पापवादः भवितुं न शक्नोति । सापि नियमानुसारेण वैदिकानामृषीणां पूर्वजैः स्वभावानुभावानामधारे प्रवर्तिता सति आस्तित्वम् प्राप्तवती सिध्यति । यथा प्रत्येकम् वाङ्मयस्य स्वकाले पूर्वतः प्रचलिताः विभिन्नाः मान्यताः पश्चादभिव्यनक्ति तथैव श्रुति वाङ्मयस्य विभिन्ना अंशाः - मन्त्रा, ब्राह्मणानि आरण्यकानि, उपनिषदः अपि स्वकालेषु पूर्वतः प्रचलिताः मान्यताः पश्चादभिव्य जन्ति । यथा प्रत्येकं वाङ्मयस्याभिव्यक्तासु पूर्वप्रचलितासु मान्यता स्वाधारितत्व हेतोः ताभ्य उत्तरवर्तिनी भवति, तथैव श्रुति वाङ्मयस्य विभिन्नाः अंशा अपि स्वैरभिव्यक्तासु मीमांसकाः भारतीय परम्परागत मान्यतानुसारेण तद् अनाद्यपौरुषेयं च मन्यते अर्थात् कस्मिन्नपि काले विशेषे केनापि पुरुषविशेषेण तस्य रचना न कृता । अस्याः मान्यतायाः प्रबलतमाः प्रतिपादकाश्च भारतीयाः मीमांसकाः सन्ति । केनचित् आन्तरिक मतभेदेन सह एषाम् प्रमुखं मतमास्ति यदस्य जगतः कदापि सृष्टिः न जाता, न च अस्थ प्रलय एव भविष्यति । इदं जगत एवमेव अनादिकालात् प्रवर्तमानमस्ति अनन्तकाल पर्यन्त च प्रवृत्तम् स्थास्यति ।

पूर्वं प्रचलितासु मान्यतास्वाधारितत्व हेतोः ताभ्यः उत्तरवर्तिनः सन्ति। स्पष्टं भवति एवं यदि यत् श्रुति वाङ्मये अभिव्यक्तानां मान्यतानां समष्टिभूता सा संस्कृतिः सांस्कृतिक परम्परा वा या स्वकीयस्य सर्वप्रथमस्य वाङ्मयस्य वेदस्य नाम्नाधारे 'वैदिक संस्कृतिः' 'वैदिक परम्परा' वा इति नाम्ना प्रसिद्धास्ति, वेदभ्यः पूर्ववर्तिणी अथ च एषा रचनायाः आधारभूतास्ति। शब्दान्तरेषु 'वैदिकी संस्कृतिः वेदानां दानम् नास्ति।

अपितु स्वयं वेदाः एव अस्य दानात् सन्ति। वेदानां साहाय्येनापि इदमेव ज्ञातं भवति यद् इयं परम्परा वेदानामाधारे न एव प्रवृत्ता, अपितु तेषामुद्भवादपि पूर्वं सुदूरे अतीतकाले प्रवृत्तासीत। यथा च येनः पूर्वे पितः सोम्यासो नूहिरे सोमपीथं वसिष्ठाः।[८] इत्यानेन स्पष्ट संकेतः प्राप्यते यत् अस्य मन्त्रस्य प्रणेतुः ऋषेः वशिष्ठ गोत्रोत्पन्नार्थम् एतादृशः पूर्वे पितरः अपि भूतवन्तः सन्ति ये सोमपीथस्य अर्थात् सोमपानस्ययोजनं कुर्वन्तः आसन्। अपि च त्वया हिनः सोम पूर्वेकर्माणि चक्रुः पवमानाधीराः[६] इत्यनेन ज्ञातं भवति। यस्य मन्त्रस्य प्रणेतुः ऋषेः 'पूर्वे' पितरः सोमसाध्यानि कर्माणि सम्पादितवन्तः, वैदिकमन्त्राणां रचनायाः पूर्वमेव सोमपानस्यान्येषां च सोमसाध्यानां यज्ञादिकर्मणा सम्पादनस्य परम्परा प्रवृत्ता अभवत्। उक्तेषु मन्त्रेष्विदं तथ्यमपि ध्येयमस्ति यद् तथा सर्वेषमपि पितरः पूर्वजाः वा पूर्ववर्तिनः एव भवन्ति, पुनरत्र तेभ्यः 'पूर्वे' इति विशेषणं स्पष्टं भवति। यदत्र उक्तानाम् कर्मणां कर्तारः ये पितरः पूर्वजाः वा निर्दिष्टाः सन्ति, ते सुदूरे अतीतकाले अभवन्। इत्थं च वेदगेया सांस्कृतिक परम्परा वेदेभ्यः सामान्यतः पूर्ववर्तिनी एव नास्ति, अपितु तेषामुद्भवात् पूर्वं सुदूरे अतीतकाले प्रवृत्ता भवन्त सिद्ध्यति। एवमपि इयं वेदसमेतस्य समस्तस्य श्रुति वाङ्मयस्य सुदूरवर्तिनी आधारभूता च गेया परम्परास्विती हेतोरस्मिन् अर्थे 'वैदिक परम्परा' न कथयितुं शक्यते यद् इयं वेदेभ्यः प्रसूता प्रवृत्ता वा

अभवत्, अपितु केवलमस्मिन्नर्थे कथयितुं शक्यते यत् कामं पश्चात् अस्याः गौरवगानं ब्राह्मणारण्यकोपनिषत्सूत्रस्मृति- पुराणादिभिः विभिन्नैर्ग्रन्थैः कृतम्, किन्तु पुनरपि केवलम् वेदैः एव अस्यै सर्वप्रथमं वाङ्मयाभिव्यक्तिः दत्त्वादियम् मूलतः 'वेदगीता परम्परा' अस्ति फलतः वेदैष्वस्तित्वम् प्राप्तवत्सु सुत्सु अस्याः अग्रिमः विकासः एषामेवाधारणे जातोऽस्ति । अस्त्वेवं वैदिकी संस्कृतिः वेदवाङ्मयस्याधार भूतास्ति । अथ च यतः वेदवाङ्मयं विश्वस्य प्राचीनतमं वाङ्मयमस्ति । अतः तस्याप्याधारभूतेयं संस्कृतिः सुतशं विश्वस्य प्राचीनतमा संस्कृतिः सिद्ध्यति । वेदसाहित्यं कियत्प्राचीनतमस्ति, इत्येव यदा आधुनिकः इतिहासः ज्ञातुं न अशक्नोत, तदाधारभूता 'वैदिक संस्कृतिः' कियत्प्राचीना इति तु नितरां आधुनिकेन इतिहासेन ज्ञातुमशक्यम् ।

वैदिक वाङ्मये मन्त्रेष्वभिव्यक्तायाः दार्शनिक विचारधारायाः विभिन्नेषु स्वरूपेषु ध्यानदानेन इदं तथ्यं सर्वप्रथमं स्पष्टतः ज्ञातं भवति यत् तेषु कुत्रापि इदं भौतिकं जगत्स्वरूपेण स्वभौतिक शक्त्या एव प्रतिष्ठितं न अमन्यत, अपितु कस्यांचित देवादिकायामति भौतिक शक्त्यामेव प्रतिष्ठितं अमन्यत । परिणामतः अस्यां संस्कृतौ शुष्काय भौतिकवादाय प्रश्रयः दीयमानः ~~क्वचित्~~ कदापि न दृश्यते ।

वैदिक वाङ्मयस्य यानि यानि विभिन्नानि स्वरूपाण्युपलभ्यते तानि तानि मुख्यतः त्रिषु वादेषु देववादः, पुरुषवादः, तत्ववादश्च अन्तः स्थापयितुं शक्यन्ते । एषु देववादस्य स्वरूपं बहुदेववादोऽस्ति, यश्च रूपद्वये देवातिदेववादीयः बहुदेववादः एकाधिदेववादीयः बहुदेववादः प्राप्यते । अनयोः : प्रथमरूपस्यानुसारेण स्वाम् स्वाम् स्वतंत्रतां सत्तां दधतः विभिन्नाः देवाः निमित्तकारण रूपेण जगतः विभिन्नानामंशाना-मुत्पादकानि धारकाणि संचालकानिच मतानि सन्ति, अथ च अनिश्चयात्मकरूपेण कदापि कोऽपि देवः कदापि च कोऽपि अन्यदेवातिशायी उत्कृष्टश्च घोषितः अस्ति ।

अपरस्य रूपस्यानुसारेण देवानां बहुत्वे यथावत् स्वीकृते पि, ते स्वतन्त्र सत्तारूपा: न सन्ति । अयमधिष्ठाता देवश्च केवल: निमित्तकारणरूपे सम्पूर्णस्य जगत: उत्पादक:, धारक:,संचालकश्च मत: ।

आध्यात्मिकाधिभौतिकाधिदैविकभेदात् वेदार्थानां प्राधान्येन त्रैविध्यम् । सायणाचार्येण यथाप्रदेशं सर्वविधा एव अर्था: उद्घाटिता: यथा इन्द्रशब्द ईश्वरदेवज्ञान विद्युत्पर: प्रदर्शित: । वृत्रश्च असुरासान मेघार्थको विवृत: । अस्मिन् संसारे जीवन निर्वहणार्थं मानवज्ञानमावश्यकं भवति तावद भगवता परमेश्वरेण वेदद्वारा जनेभ्य: प्रदत्तम्। वेदे वर्णितं यथा- 'यथेमां वाचं कल्याणीमावदानि जनेभ्य: ।इति ।तदेवं वेदेषु सर्वेषामेव जिज्ञासूनामधिकार: प्रतिपादितो भवति ।

ऋग्वेदादि संहितासु नक्षत्रविद्याया भूयांसि स्थलानि विलोक्यन्ते ।नक्षत्रं नाम ज्योति: । तद्विसामार्थं यदनुशासनं क्रियते तत् खलु ज्योतिषम् । ज्योतिश्चाधिकृत्य कृतो ग्रन्थो ज्योतिषम् । उक्तादिषु न्याय निरूक्तादिशास्त्रै: सह ज्योतिष शब्दो पि पठित: । शाकटायनस्य व्याकरणे तु ज्योतिष शब्दा दण् औत्वाभावास्तु निपात्यते । नेत्रं ज्योतिषमदिंति कृत्वा शास्त्रमिदं वेदोपकारकत्वाद् वेद पुरुषस्य चक्षु: स्थानीयं मतम् । लगध प्रणीत: पद्यमयो लघुग्रंथस्तावद् ऋग्वेदांग ज्योतिष नाम्ना प्रसिद्धा इदानीमपि समुपलभ्यते । किन्तु शास्त्रत्वेन त्रिधा पुष्पितं फलितं चेदं ज्योतिषं जगन्मार्गदर्शक पदं लेभे ।[१०] इतो गतिमिदं पाश्चात्ये जगतिविविधेषु स्वरूपेषु पुल्लावितमन्भूत । तज्ज्ञानमपि समये तज्ज्योतिषशास्त्र शाखासु समावेशितमिति यथार्थतो विज्ञान पदमलाभि ज्योतिषशास्त्रेण वराहमिहिर कालादारभ्येद तादृश ज्ञान समावेश साध्यमवलोक्यते ।[११] सवाई जयसिंह कालेतु स्पष्टतो यवन भाषया रम्यभाषया च च लिखितानां केषांचन ज्योतिष ग्रन्थानां समजनि संस्कृतानुवाद: ।

## वैदकाल निर्णय :

भारतीय विद्वदिभ: वेदस्य काले गणना विषयको प्रयत्न: कृत: सम्यकृतया निर्णीतुं समर्थो नास्ति । केचन अस्यैकालगणना ख्रैस्त संवत्सरात्प्राक् सहस्त्रवर्ष देशीय: । केचन तत्प्राक् २००० वर्षदेशीय:, अन्ये भारतीय विद्वत्सु बालगंगाधर तिलक महोदया: ख्रैस्त पूर्व: ७००० देशीय:, अविनाश चन्द्रदास: २५००० वर्षादारम्य ७५००० वर्षपर्यन्तसमयान्तयत एव वेद निर्माणकाल: इति निश्चिन्वन्ति।

निश्चयेनेदं कथयितुं शक्यते यद्वेदोहि विश्वप्रपंचस्य ज्ञानराशेरपूर्वोनिधि: । तेषां नित्यत्वमपौरुषेयत्वंच प्रायश: सर्वै: प्राचीनाचार्यै: स्वीकृतम् । भगवता कुल्लूकभट्टेन उक्तं "प्रलय कालेऽपि परमात्मनि वेदराशि स्थित: " इत्युक्तिरपि वेदानां नित्यत्वं निश्चिनोति । वेदमन्त्रेषु पठितान् शब्दानेवादाय लोके नामानि कृतानि आदौ, तत: कालान्तरे च तानि व्यक्तिविशेषाणां नामानि वेदमन्त्रेषु दृष्टिपथं गतानि इतिहासं परामृशन्ति । वस्तुत: वेदेषु इतिहास गन्धोऽपि नास्ति नित्यत्वात् इति सर्वे वैदिका: आमनन्ति । भगवता मनुना तु "नास्तिको वेदनिन्दक:" १२ इति वेदनिन्दको नास्तिक इत्युदघोषितम् । एवं सर्वैरपि ब्रह्मसागर कल्पोपनिषत्प्रभृति भिर्निखिल: सन्दर्भे वेदानां मुक्तकंठेन ईश्वरत्वं स्वीकृतम् । तदेवं तु वेदनित्यत्ववादिनां नयेतु वेदाविर्भाव कालनिर्णयस्य प्रश्न एव नोदेति । परन्त्वैतिहासिकानां नये पि वेदानां कालनिर्णयो न सुकर: । पाश्चात्यविदुषा माक्समुलर महाभागेन ऋग्वेदस्यावतरण काल: ख्रैस्ताब्दात् प्राग्द्वादशशतमितोऽवधारित: । परं तन्निर्णयोऽप्येषोऽनुमानिक: न खल्विदमित्थन्तया निर्णीत: । एवमन्ये पि कोलब्रुक-विल्सन-कीथ प्रभृतिभिर्महानुभावा: अपि माक्समूलरमेव अनुसरन्ति । हाग-आर्कविशपाधा: अन्ये पाश्चात्य विद्वांस: ऋग्वेदस्य काल: ख्रैस्त प्राक्सहस्र-द्वयवर्षमितं परिकल्पयन्ति ।

कल्पसूत्रेषु श्रवणनिमवलोक्य शार्मण्यदेशीय ज्योतिर्विदा जैकोबीमहोदयेनाङ्कितं यत्पुराकाले श्रमति भास्वरं सुस्थिरञ्चासीत । तस्य तादृशस्थितिकाल: ख्रैस्तप्राक् २७०० वर्षमित: संभाव्यते । तदित्थं कल्पसूत्राणां निर्माणकाल: ४७०० वर्षदेशीय: । ज्योतिर्विद्यानुगुण्येन जैकोबी नाम्ना विदुषा वेदकालनिर्णय: ६५०० वर्षादप्याधिककाल: निर्धारित: । एव एव लोकमान्य बालगंगाधर तिलक महाभागेन प्रतिपादितं यन्मप्र मध्ये कृत्तिका एव सर्वप्रथमत्वेनाभिमन्यते । ब्राह्मण निर्माणकाले कृत्तिकानक्षत्रे एव नक्तं दिवोभय साम्यं भवति स्म ।

एवं परमधत्वे पि एकविंशति मार्चमासे त्र्योविंशति सितम्बर मासे च रात्रिदिवसयो: साम्यमुपजायते । सूर्यश्च तदाश्विनी नक्षत्रे स्थितो भवति, खगोलज्योतिषयो: सिद्धान्तानुसारेण एतत्परिवर्तनं महतो दीर्घात् ४५०० मिताद् वर्षात् पूर्वमेव भवितुं सम्भवति । स एव ब्राह्मणग्रन्थनिर्माणकालो पि भवितुमर्हति । मन्त्र संहिताकाले नक्षत्राणां गणना मृगशिरो नक्षत्रत: उपक्रमते स्म । एतन्नक्षत्र गते सूर्ये रात्रिदिवसश्च साम्यमश्नुवातेस्म ज्योतिषखगोल शास्त्रानुसारेण स्थितिरियं ६५००० वर्ष पूर्वं संभवितुमर्हति । अत: संहितानामपि निर्माणकाल: ६५०० वर्षमित एव भवितुमुपपद्यते । लोकमान्य तिलक महोदयानां मते सहस्रद्वयवर्षाभ्यन्तरमेव संहितान्तर्गता सर्वे मन्त्रा विरचिता अभूवन् । अत: कतिपया: प्राचीना ऋच: ८५०० वर्ष पूर्वं विरचिता विभाव्यते । मृगशिरो नक्षत्रे वसन्त सम्पात घटनमेव तिलक महाभागस्य बलीयसी युक्ति: प्रतीयते । उक्त तत्व निर्धारणे एव श्रविष्ठायां रात्रि दिवस साम्यमधिगम्य तिलको बालगंगाधर: मैत्रायणी संज्ञकोपनिषदो निर्माणकालं त्रिसहस्रवर्षमित् मेवधारयति । एवं तस्य निर्धारिते कृते सति ऋग्वेदस्य काल: ८००० वर्ष मितो नुमान पथमारोहति ।

पुण्य पत्तन निवासिना नारायण भवनराय पावगी महाभागेनतु भूगर्भशास्त्र प्रमाणे ऋग्वेदस्य निर्माणकाल: नव सहस्र वर्ष सम्मित: समुद्घोषित: एवं चै: कैरपिविद्वद्भिर्वेद निर्माण-कालो निर्धारित: तै: यथार्थ साधना सौलभ्यात् केवलं स्वमन: कल्पितानुमानानुरो धेनैवेति तद्भिया कृतं निर्धारणं कियधावत्प्रामाण्यं कोटि मधि कर्तुमर्हति । अथ अन्धानुकरण मात्रमेवानु हरत्येतत। तुल्यतु न्यायेन स्थिति वशं वदतथा अस्माभिरपि तेवामेव मतं तत्तदवबोधाय तथैव यथा स्वरूपं प्रतिबिम्बी कृतमप्रा तदत्र प्रामाण्याप्रमाण्य निर्णायका विद्वांस: एव प्रमाणम् । वेदस्य निर्माणकाल निर्धारणास्य दुरूहता न केवलमस्माभिरेव समुट्टंकिता अपि अन्यदेशीय विदुषां सम्मितिरप्य स्मन्मतेन सह पूर्ण संवादं भजते । पाश्चात्यै: काल विद्भि: वेदानाम-विभकाल: खैस्ताब्दात् पूर्व सहस्रत्रय (३०००) वर्ष पर्यन्तं निर्धारित: । अपरैश्च षट्सहस्र वर्ष पर्यन्तं भारतीय विद्वद्वरेण्येन श्री बालगंगाधर तिलक महाभागेन स्वकीय 'ओरायन' नाम्नि पुस्तके षटसहस्र वर्षादपि पूर्वकालिको वेदकाल: निर्धारित:। वेदोपवर्णितं ज्योतिषतत्व दृष्टि मनुसंधाय विद्वद्वर- मैक्समूलर- महोदयेनापि खैस्त-शतकात्पूर्वत्रयोदश शताब्धा अन्ते कतिपय ऋचां निर्माणकाल: स्वीकृत: एवं ह्विटनी प्रभृतिभि: महाभागैश्च खैस्त पूर्व २००० वर्षमित: मैकडानैल महोदयेन खैस्त पूर्व १५०० वर्षमित: काल: निश्चित: । एवं वेदरचना कालविषये विदुषां भूयान् मतभेद: शार्मण्य विदुषा बैवर महाभागेन युक्तमेवोक्तं यदधुना चिरन्तनातीत काल सम्भावानां वेदानां निर्माणकाल निर्णये प्रयासो पार्थ एव न स इदानीं कथमपि इदन्तया निर्णेतुं शक्य: । वस्तुत: भारतीय विद्वद्वराणां दृष्ट्या तु वेदा नित्या एव ईश्वरीय ज्ञानत्वान्न तेषां को पि निर्माणकाल: सम्भवितुं शक्य:। केचिद् इत्थं मतमुपस्थापयन्ति । अस्यापि रचना कोऽस्मिन्नपि काले केश्चित् महापुरुषै: एव जाता अस्ति । तथापि निश्चयेन इदं कथयितुं कठिनमस्ति यदस्य रचना कदा अभवत् । वेदवाङ्मयम् को पिएको ग्रन्थ विशेष नास्ति, अपितु विभिन्न कालेषु

विभिन्नै महापुरुषै ऋषिभि: प्रणीतानाम् विभिन्नानां कृतीनाम् एका संकलिता समष्टिरवि एवश्च अस्य रचनाया: एक दीर्घकालीना परम्परा कस्मिन् काले प्रवृत्ता अभवत् ।

इदं प्रमाणं तथा च तस्य गणितं स्वसमीपे नास्ति । यत् इयं परम्परा कस्मिन् सुदूरे अतीतकाले प्रवृत्ता अभवत् । यदवधि निश्चयात्मकतया सहगन्तुं इदानीमपीतिहासस्य गति: सामर्थ्यशीता नास्ति । अथ विश्वस्य प्राचीनतम रूपस्य अस्य वांगमयस्य रचना कदा जाता, अयमपि महान् गवेषणा विषय: तथा चिन्तनस्य विषय: वर्तते । अतएव आधुनिककाले विभिन्नैर्विद्धिद्भिस्य रचनाकाले विचार: कृत स्वानि स्वानि विभिन्नानि मतान्यपि प्रदर्शितानि कृतानि सन्ति । तेषु १८५६ ईवीये वर्षे मैक्समूलर महोदयस्य "प्राचीन संस्कृत साहित्य" नामकं ग्रंथं प्रकाशितवान् । तस्मिन् ग्रंथे मैक्समूलर महोदयस्य एवं मतं वर्तते, यत् बौद्धधर्म: तद्वांगमयं च सम्पूर्णस्य वैदिकस्य वांगमयस्य पूर्वास्तित्वम् स्वीकरोति, फलत: अत्र कश्चन सन्देह: नास्ति, यत् वैदिक वांगमयं यास्मिन् संहिता:, ब्राह्मणानि, आरण्यकानि, उपनिषद: कल्पसूत्राणि समाविशन्ति, महात्मन: गौतमबुद्धात् पूर्वमास्तित्वम् प्राप्तवानासीत् । सम्पूर्णस्य वैदिक वांगमयस्य रचनाकालं वैदिकयुगं वा अयं चतुर्षु कालेषु विभाजितवान्- छन्दकाल:, मन्त्रकाल:, ब्राह्मणकाल: सूत्रकालश्चेति ।

प्रत्येकं कालो यं शतद्वय वर्षपरिमित: एतच्चास्मिनाधारे यत् प्रत्येक कालस्य रचनायां भाषाया: अथ च विषयस्य विचारधाराया वा विकासाय इयत् त्रिशत् वर्षाण्यनन्तरमपेक्षितमस्ति महात्मा गौतम बुद्ध: ईसात: पूर्वं षष्ठशताब्दयाभभवत् तदनन्तरम् बौद्ध धर्मस्य विकास: ईसात: पूर्वं पश्चाशताब्दयां प्रवृत:, अथदमनुमीयते वैदिक युगस्य अन्तिमकालस्य सूत्रकालस्य प्रारंभं ईसात:

पूर्व । षष्ठशताब्दयाभमदत । ईसात: पूर्व अयं सप्तमाष्टम शताब्दी कालं ब्राह्मणकाल मन्यत् । तस्मिन समये एव ब्राह्मण्यारण्यो कौपनिषदस्थ रचना संजात: । अस्यानुसारेण इसात: पूर्व सहस्राष्ट्याताराम्याष्टम शताब्दी प्रारम्भ पर्यन्तं कालो यं मन्त्रकाल: अस्ति । यस्मिन् समये अनु यज्ञानानुष्ठानस्य दृष्टया मन्त्राणाम संहिता रूपे संकलनम् जातम् । ईसात: पूर्व द्वादशशताब्दयातारम्य सहस्राब्दी प्रारम्भ पर्यन्तं च छंदकाल: अस्ति, यस्मिन् मौतिकरूपेण मन्त्राणाम् रचना जाता । यत: मन्त्रभागे ऋग्वेद: प्राचीन-तमोस्ति, अत: अस्यानुसारेण ऋग्वेदस्य रचना काल: प्रारम्भ: ईशात: पूर्व द्वादशशततमम् वर्षमस्ति ।

मैक्समूलरस्य इदं मतं कियत् काल्पनिकमस्ति इति कथनस्यावश्यकता नास्ति । इदं तथ्यं स्वयमेव तेन अनुभूतम्, अत: पश्चात् एकोन नवत्युत्तराष्टादश शततमे(१८८९) इसवीये वर्षे स्वकीयाया: `जिफोर्ड` व्याख्यानमालाया: अवसरे भौतिक-धर्म शीर्षके व्याख्याने स: घोषितवान् यत् तन्निर्दिष्ट वेदरचनाकालो नुमान मात्रमस्ति, अथ च वस्तुत: इदं को पि न कथयितु शक्नोति, यत् वेदानां रचना कदा जाता । एवं तस्यमतं तेनैव निराकृतं सत् वर्तते । मैक्डोनल महोदय: अपि मैक्समूलर निर्दिष्टात् वैदरचनाकालादिता तत: एव ऋग्वेदस्य रचनाकालं मन्यते । एतद्वारा संकलितस्य सम्पादितास्य च `वैदिक रीडर` नामकस्य पुस्तकस्य `परिचये` अस्य कथनमास्ति यत् यद्यपि ऋग्वेदस्य वास्तविक रचनाकालो नुमान मात्र विषय: , पुनरपि इयत् निश्चयात्मक रूपेण कथयितुं शक्यते, यत् ऋग्वेदस्य प्राचीनतमानि सूक्तानि ईसात: पूर्व त्रयोदश शताब्दया: अर्वाचीनानि न सन्ति । अस्य मतमस्ति, यत् `अवेस्ता` नामकस्य वाग्मयस्य प्राचीनतम: भाग: इसात: पूर्वस्या: अष्टम् शताब्द्या: पूर्वकालीनो न भवितुं शक्नोति । अस्य भागस्य ऋग्वेद सूक्तै: सह घनिष्ठो घनिष्ठ: सम्बन्ध: अस्ति, यत् यदि अस्य भाषा प्राय: पञ्चशताब्दया:

पूर्वं नीयेत चेत् महता काठिन्येन सो ऋग्वेदभाषाया: भिन्नत्वं स्थापयितुं शक्नुयाद अर्थात् ऋग्वेदस्य भाषा शताब्दि पंचके विकासिता सती 'अवेस्ता' भाषा रूपे अभवत् ।

जैकोबी महोदय: ज्योतिष शास्त्र मवलम्ब्य स्वकीयमतमुपस्थापयति । कल्पसूत्राणां विवाह प्रकरणे प्राप्तेन 'ध्रुव इव स्थिरा भव' इति वाक्येन प्राप्तवान् यत् पूर्वम् ध्रुवो ष्क्कि प्रकाशमान: स्थिरश्चासीत् । एतादृशी स्थिति: प्राय ईसान: पूर्व २७०० वर्षं आसीत्, अत: कल्पसूत्राणां रचनाकालो यमेवास्ति ।

वेदानामपि रचना च अस्मात् कालात् अतिशयित रूपेण पूर्वम् अभवत् । एवं ध्रुवस्याथैव अन्येषां ग्रहाणां नक्षत्राणां च स्थितेराधारे ज्योतिर्विज्ञान साहाय्येन जैकोबी महोदय ऋग्वेदस्य रचनाकालं ईसात: ४५००० वर्षं पूर्वमेव स्वीकृतवान् श्री शंकर बालकृष्ण दीक्षित महोदय: स्वकीयं मतं शतपथ ब्राह्मणे वर्णितं सूत्रमवलम्ब्य इत्थमुपस्थापयति[२३] यत् यत: ज्योतिर्गणानुसारेण कृत्तिकानाम् पूर्वायै बिन्दौ खवृते स्थिति: प्राय: ईसान: पूर्व २५०० वर्षं संभाव्यते, अत: शतपथ ब्राह्मणस्य रचनाकाल: अयमेवकाल: ~~के~~ अस्ति । यत: ऋग्वेद: शतपथ ब्राह्मणात् नितरां प्राचीनतर: , अत: तस्य रचनाकाल: ईसात: पूर्व ३५०० वर्षात् परवर्ती कदापि न भवितुं शक्नोति । अस्य कालस्य निर्धारणे ~~र्क~~ दीक्षित महोदय: वसन्तस्याप्याधारं गृहीतवान्, तदाधारेणापि च पूर्वमेव निष्कर्षं प्राप्तवान् । लोकमान्य बालगंगाधर तिलके नापि दीक्षित महोदयस्य कृत्तिकानक्षत्रे वसन्तसम्पातस्थिते: वर्णनस्याधारे ब्राह्मण ग्रन्थानां रचनाकाल: ईसात: पूर्व प्राय: २५०० वर्षं स्वीकृत: । स एव इदं अनुसंहितवान् यत् ऋग्वेदे मृगशिरसि पुनर्वसौ च वसन्त सम्पातस्य स्थिते: वर्णनमस्ति । गणनया पुनर्वसौ वसन्त सम्पात

स्थितेः वर्णनमस्ति । गणनया पुनर्वसौ वसन्त सम्पात स्थितिकालः ईसातः प्रायः षट्सहस्र वर्षेभ्यः प्राक् सिध्यति ।

तत्र आदितिकालः (६०००-८०००) ई० पू० ।

पुनर्वसौ वसन्त सम्पात स्थितिकालः एतन्नक्षत्राधि देवतायाः अदिते नाम्नः आधारे 'अदितिकालः' कथितः अस्ति । तिलक महोदयानुसारेण अस्मिन् युगे कतिपयाः प्रारम्भिकाः वैदिक्यः रचनाः गद्य पद्ये च जाताः यासां च देवयजने प्रयोगः क्रियते स्म ।

मृगशिरः कालः (४०००-२५०० ई० पूर्व) अस्मिन् काले ऋग्वेदस्य मन्त्राणां अधिकांशतः रचना जाता । आर्य सभ्यतायाः वैदिक रचना विकासस्य च दृष्ट्या अयं महत्वपूर्णःकाल आसीत् । कृत्तिकाकालः (२५००-१४०० ई० पूर्व) अस्मिन् काले विभिन्नानाम् संहितानाम् ब्राह्मणग्रन्थानां च रचना अभवत् । वेदांग ~~ज्योतिषस्य~~ ज्योतिषस्य रचना अस्य युगस्य च अन्तिमे भागे अभवत् । अन्तिमकालः)१४००-५०० ई०पू०) अस्मिन् काले कल्पसूत्राणां दर्शनसूत्राणां च रचना अभवत् । अस्य कालस्य अन्तिमे भागे बौद्धधर्म वैदिक धर्मस्य प्रतिक्रिया रूपेण उद्भूतवान ।

ऋग्वैदिक इण्डिया नामके ग्रन्थे अविनाशचन्द्र महोदयेन ऋग्वेदे वर्णितानि भौगोलिकानि भूगर्भसम्बन्धीनि च तथ्यानि उद्घाटितानि । 'अथः समुद्राश्चतुरः[१४] इत्यस्य' एका चैतत् सरस्वती नदीनां शुचिर्यती गिरिभ्यः आसमुद्रात्'[१५] इत्यस्य प्रतिपाद्यस्य आधारे अयं इमं संकेतमाप्तवान् यत् चतुर्षु समुद्रेषु एकः पंचनदस्य दक्षिणतः राजस्थाने आसीत् यस्मिन् एव सिंधु सरस्वत्यादि नदीनाम् संगमस्य ऋग्वेदे वर्णनमस्ति । अद्य सः समुद्रः नास्ति । अतः भूगर्भशास्त्र विदुषामनुसारेण

राजस्थान समुद्रस्य स्थिति: ईसात: २५०० वर्षेभ्य: प्राक् आसीत् , अत: उक्तस्य समुद्रस्य तस्मिन् च नदीनां संगमस्य वर्णनं कुर्वत: ऋग्वेदस्य रचनाकाल ईसात: २५००० वर्षेभ्य: प्रागस्ति । अथ विश्वस्य प्राचीनतमस्य वाङ्मय ऋग्वेदस्य रचना एतादृशे सुदूरे अतीतकाले अभवत् यत् तत्र प्राप्तुमधुनावध्याधुनिक: इतिहासे समर्थो स्ति। यदि विशिष्टरूपेण कथ्येत चेत् इदमेव कथयितुं शक्यते यद्यतो हि ऋग्वेदे अग्ने: प्रकाशमानम् स्वरूपं कार्यं विविधं महत्वं च प्रति महत् आश्चर्यम् प्रकटितम् सत् वर्तते । अत: संभाव्यते यत् तस्य रचना तस्मिन् समये प्रारब्धा यदा अग्ने: आविष्कारे जाते सति अधिक: कालो न व्यतीतो भवत् ।

वेदस्य महत्वम् :

भारतीय वांग्मये हि केवलं न अपितु विश्वसाहित्ये आदिकालादारभ्य अद्यावधि पर्यन्तं वेदस्य परमं महत्वं वर्तते । अनन्तरं च स्थास्यति । वैदिककाले शब्द प्रामाण्यस्य यदधिकं महत्वमासीत् तदेव वर्तमानकाले पि वर्तते । शब्द प्रमाणस्य दृष्ट्या च सम्पूर्णं वांग्मयम् श्रुति स्मृति वर्गद्वये विभज्य 'श्रुति:' स्वत: प्रमाणरूपे सर्वोपरि प्रमाणं मन्यते स्म । तद्व्यतिरिक्तं च सम्पूर्णं वांग्मयं स्मृते: अन्त: कृत्वा तत् श्रुत्यनुकूलं सत् एव प्रमाणं मन्यते स्म । वैदिके समाजे परम्परागतरूपेण श्रुति- वांग्मयमेतादृशं स्वत: प्रमाणं वांग्मयं मन्यते स्म । यदस्य प्रामाणिकतायाः सम्बन्धे कदापि केषांचित तर्काणां युक्तीनां वा आधारे कीदृशो पि को पि सन्देह: एव न प्रकटित: । अपितु अस्य प्रतिपाद्यं सदैव पुरुष स्वभाव सुलभैश्य: भ्रमप्रमादविप्रलिप्सादि दोषेभ्य: सर्वथा मुक्तं रहितं वा मत्वा शिरोधार्यरूपेण स्वीकरणमभवत् । यद्यप्यस्य अर्थ निर्धारणस्य प्रयत्न: तु सदैव जात: फलतश्च अस्मिन सम्बन्धे विवादो पि प्रचलित: सन् वर्तते स्म । किन्त्वस्य प्रामाणिकतायाः सम्बन्धे कदापि को पि विवादो नाभवत् , अपितु सर्वै: अस्य प्रामाण्यं केनापि संदेहेन संकोचेन वा विना नतमस्तकै: सद्भि: स्वीकृतम् । संस्कृत वांग्मयस्योपरि दृष्टिपातकरणेन ज्ञायते यत् वेदादनु अस्तित्वम् प्राप्नुवता सर्वेणापि वांग्मयेन प्राय: प्रत्यक्षतो प्रत्यक्षतो वा वेदमुपजीव्य तदाधारेण स्वप्रतिपाद्य प्रतिपादनं कृतमस्ति । ब्राह्मणानि प्रत्यक्षतो वेदमन्त्राधारेण स्वप्रतिपाद्यं प्रतिपादयन्ति तेषां विनियोगं प्रदर्शयन्ति, तदर्थात् च यथावसरं प्रकाशयन्ति आरण्यकोपनिषदो वेदमन्त्रेषु बीजरूपेणाभिव्यक्तं दर्शनं पल्लवितं कुर्वन्ति । सूत्राणि स्मृतयश्च तेषामाधारेणैव विभिन्नाना चारान् लोकव्यवहारान् च प्रदर्शयन्ति । इतिहास पुराणानि वेदाख्यानानि एव पल्लवितानि कुर्वन्ति । तानि च आश्रित्य पुन:

विभिन्नानां काव्यनाटकादीनां रचना जाता । अन्ये च ग्रन्था: स्वप्रतिपाद्य प्रतिपादने वेदाधारेणैव अग्रेसरा: भवन्ति । एवं वैदिक वांग्मयं सर्वेषु वांग्मयेषु उपजीव्यत्व रूपे परमं महत्वं धत्ते ।

वेदस्य सर्वप्रथमं महत्वं तु तस्य विशुद्धं धार्मिकं महत्वं वर्तते । भारतवर्षे ~~विशुद्ध-धार्मिक-महत्व~~ वैदिके समाजे सर्वे पि धार्मिक: क्रियाकलापो वेदाधारेणैव सम्पाद्यते । तदाधारेण तदाधारित ग्रन्थाधारेण वा एवस्यापि कृतिषु धार्मिकत्वा धार्मिकत्वान्निर्णय: क्रियते ।

वेदस्यापरं सांस्कृतिकं महत्वं वर्तते । भारतीयानां सर्वस्यापि सांस्कृतिक जीवनस्य प्रत्यक्षतो मे अप्रत्यक्षतो वा मूलं वेदवांग्मयमेव अस्ति ।

वेदस्यापरं दार्शनिकं महत्वं वर्तते । यानि मुख्यानि भारतीयानि दर्शनानि सन्ति, तेषां विचारधारायां यत्किंचित् तत्वं तु वेदे नुसंधातुं शक्यते एवं किन्तु भारतस्य यत् राष्ट्रीयं दर्शनं वेदान्तो वर्तते, तस्य तु मूलं वेद एव वर्तते । या दार्शनिकी विचारधारा मूलरूपेण वेदे भिव्यक्ता तस्या क्रमिको विकासो उपनिषत्सु दृश्यते, उपनिषदाधारेण च वेदान्त दर्शनस्य स्थापना जाता तस्य च विकासाग्र ब्रह्मसूत्र तद् भाष्यादिषु जात:। वेदस्यापरं साहित्यिकं महत्वं वर्तते । यथा अधुनैव पूर्वं दृष्टं, समस्तस्य संस्कृत वांगमयस्य प्रत्यक्षतो प्रत्यक्षतोवोपजीव्यं वेदवांग्मयं वर्तते । वेदमनु अस्तित्वं प्राप्नुवता संस्कृत वांग्मयेन तस्मात् साक्षात् व्यवहितरूपेण वा भाषा शब्दावली वा गृहीता प्रतिपाद्या अर्था अपि गृहीता: । स्वयमपि वेदे या साहित्यिकता वर्तते । तस्या अपि न्यूनं महत्वं नास्ति ।

तस्मिन् यद् विभिन्न विषयाणां न्यूनाधिकरूपेण सूक्ष्म विकसितरूपेण वा प्रतिपादनमस्ति । तद्चित्रत्यापूर्वं महत्वं द्योतयति । वेदस्यापरं भाषा वैज्ञानिकं महत्वं वर्तते । वेदः विश्वस्योपलब्धं प्राचीनतमं वांग्मयमस्ति, अतः तस्य भाषा अपि वैज्ञानिक दृष्ट्यातीव महत्वपूर्णा लोकग्राह्या चास्ति । तस्य विश्वस्य अन्याभिः प्राचीनाभिर्भाषाभिः सह भाषा वैज्ञानिकेन तुलनात्मकेनाध्ययनेन भाषा वैज्ञानिके बहु प्राप्तुं शक्यते । यत्प्राप्त्यर्थं तैः प्रयासोऽपि कृतः क्रियते च, तथा च तत्र साफल्यमपि लब्धम् । वस्तुतः तुलनात्मकभाषा विज्ञानस्य स्थापना एव। वेदभाषा परिचयेन जाता । वेदस्यापरमैतिहासिकं महत्वं वर्तते । तस्य विश्वस्योपलब्ध प्राचीनतम वांग्मयत्वात् स्वसमकालीनानां विभिन्न तथ्यानां विषये तेन प्रकाशः पातयितुं शक्यते, यश्च अनुसन्धातृभिः गृहीतुं पार्यते । भारतस्यकृतेत्विदं महत्वमत्यन्तमेवापेक्षणीयं वर्तते । अस्याधारेण प्राचीनरूपेण सिद्धस्य तस्यैतिहासस्य पुनः संघटनम् कर्तुं शक्यते । देशस्य कृते इदानीं सर्वोपरि महत्वं राष्ट्रीयं वर्तते । वेदस्याधारेणैव भारतीयैरिदमुद्घोषयितुं शक्यते । यद् विश्वस्योपलब्धं प्राचीनतमं वांग्मयं वेदरूपं तेषामेव वांग्मयमस्ति । तदाधारणैच तैरिदं कथयितुं शक्यते । यद् तेषां संस्कृतिः सभ्यता चातीव प्राचीना वर्तते । पूर्वकाले ते संस्कृताः असभ्या वा न आसन्, अपितु यदा विश्वस्य बहुनां राष्ट्राणां जन्म अपि न जातं, जातेषु अपि तेषु सम्यग् विवेक एव नोत्पन्नः आसीत् तदा प्यस्माकं राष्ट्रं ज्ञानविज्ञान युक्तं सत् सुसंस्कृतरूपेण सुसभ्यरूपेण च विराजते स्म ।

## वेदे वर्णव्यवस्था राष्ट्रभावना

## स्वराज्य प्रशस्तिश्च

वेदस्याध्ययनेनेत्थं ज्ञातं भवति यत् ब्राह्मणक्षत्रिय-वैश्य शूद्रः श्चेति चत्वारः वर्णाः सन्ति । यथाऽस्माकं शरीरे मुखं, बाहु, उरु, पदंचेति चतुः संख्याकानि अंगानि सन्ति, तथैव अस्माकं समाजे पि ब्राह्मणादयः चत्वारो ग विशेषाः सन्ति । ब्राह्मणास्तत्र मुखस्थानीया विद्याध्ययना-ध्यापनकुशला, विधायका, ज्ञानविज्ञान प्रसारका, धर्मशास्त्र प्रवर्तका, राज्यनियम व्यवस्थापका, विधि-विधान विधायकाः, परोपकारिणः, व्यक्त विशेष परिग्रहाः, तपः पुनीत विग्रहा, ब्रह्मतेजः सम्पन्नाः स्वल्प साधनाः, कौपीनधनाः, राष्ट्रनीति निर्णायिकाः प्रजाप्रणेतारश्चेति, ब्राह्मणो स्य मुखमित्यनेन पदेन व्यपदिश्यते । क्षत्रिया न्याय-ग्रह ग्रहिलाः, नीतिकुशलाः, राज्यपाला, कृतराष्ट्ररक्षणव्रता, सकल शास्त्र पारंगता, शास्त्रास्त्र विद्या कुशला, वीराः, शासकाः, तेजस्विना, वर्चस्विना, यशस्विनश्च बलिष्ठाः, श्रेष्ठाः, सहृदयाहृदयालवो, दयालवश्चेति 'बाहू राजन्यः कृतः' इत्यनेन संसूच्यते । कृषि विशेषज्ञाः व्यापारवृत्ति कुशला, धनोत्पादन-निपुणा धर्मपरायणा वैश्याश्च' ऊरूतदस्य यद्वैश्य' इत्यनेन पदेन विज्ञाप्यते । अविश्रान्त श्रमाः, सेवादेवाकिने, गतिमन्तः, जागरूकाः, शिष्टा, विप्राः सशक्ताः स्वामिभक्तास्तपः परायणाः शूद्राश्च तपसे शूद्रम पदभ्यां शूद्र इत्यनेनादिश्यते।

'ब्राह्मणो स्य मुखमासीदित्यस्मिन् सुप्रसिद्धे पुरुषसूक्ते वर्णव्यवस्थायाः वर्णनं दृश्यते । यद्यस्माकं समाजः पुरुषाकारेण पल्लवितो भवेत तर्हि ब्राह्मणो मुखस्थानीयः मुख्यः प्रधानो वा ज्ञान प्राधान्यात् । 'बाहुः राजन्यः कृतः'

क्षत्रियश्च बाहुस्थानीयः रक्षण प्रधानत्वात् । 'उरू तदस्य यद्वैश्यः ' कोष संरक्षणात् । 'पद्भ्यां शूद्रो जायत' शूद्रश्च पादस्थानीयः सेवा धर्मत्वात एवमिमे चत्वारो वर्णाः श्रुति प्रतिपादिताः वेदे समुपवर्णिताः दृश्यन्ते । तद्वर्ण कर्तव्य-मनुसन्धाय यजुर्वेदे दृश्यते -

'ब्राह्मणे ब्राह्मणं, क्षत्राय राजन्यं, मरुते वैश्यं तपसे शूद्रं इत्यत्र मरुच्छब्देन मरुतो व्यापारी व्यवदिश्यते । तपसा च सेवाधर्मो निर्दिश्यते, वेदे विश्वमेवाखिलं राष्ट्रत्वेनाभिमतम् ।

ध्रुवं ते राजा वरुणो
ध्रुवं देवो बृहस्पतिः ।
ध्रुवं तमिन्द्रश्चाग्निश्च
राष्ट्रं धारयतां ध्रुवम् ।।
ऋग्वेद १०।१७४।५

वेदे स्वराज्य प्राप्ति निर्देशो पि वर्णितो दृश्यते —

'आ यद्वा मयि वरुणा मित्रवयं च सूरयः ।
व्याचिष्टे बहुपाय्ये यतेमहि स्वराज्ये ।।

ऋग्वेद ५।६६।६

<u>वेदे आश्रम व्यवस्था :</u>

वेद वाङ्मयस्य पर्यालोचनेनैतत्स्थं ज्ञायते यन्मनुष्याणां कर्मादिभेदतः पंचश्रेणि उपदिष्टाः ब्राह्मणः क्षत्रियः वैश्यः , दासः दस्युश्चेति । तेषु चत्वारः आर्याः-

दस्युश्चानार्यः ।[26] ते भेदाः पश्चाज्जातिपदेनोपचरिताः । जाति शब्दश्च जन्मवचनः । अतएव तदनुक्रामतिकाले ते ते भेदाः जन्मना एव प्रवृत्ताः । जातिः जन्मानुसारिणीति लोकोक्तिरपि तदानुगण्येन प्रचलिता । वैदिक काले मानव जीवनं चतुर्षु विभागेषु विभक्तमासीत । ते च चत्वारो विभागाः चत्वारो आश्रमा इत्यपि उच्यन्ते । ते च आश्रमाः ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, सन्यास लक्षणाः । पंचविंशति वर्षं पर्यन्त मेकस्मिन्नेकस्मिन्नाश्रमे विश्रम्य चत्वारो पि आश्रमास्सेव्यत्वेन निर्दिष्टाः । तत्रापि ब्रह्मचर्याश्रमास्य प्रथमाश्रमस्तु सर्वैर्जनैः अपरिहार्यत्वेन परिपालनीयः । प्रथमाश्रममन्तरा आश्रमान्तराण्यनुष्ठातुं न शक्यन्ते गृहस्थादि त्रयः आश्रमास्तु ऐच्छिकाः, तत्परिपालने पुरुषः सर्वथा स्वतंत्रः । परन्तु प्रथमाश्रमानुष्ठाने स स्वातन्त्र्यं नार्हति । यतः प्रथमाश्रम एवालम्बः सर्वाश्रमान्तराणाम् सिद्धे सति प्रथमाश्रमे सर्वे आश्रमास्सफला भवन्ति इति तस्य प्राधान्यं परिहार्यत्वंच प्रतिपादितं वर्तते, आचार्यो ब्रह्मचारी सफलाचार्यो भवति । राजा ब्रह्मचारी सन्नेव राष्ट्रं रक्षति । युवा ब्रह्मचारी सफलतामश्नुते । युवतिः कन्यापि ब्रह्मचारिणी भवन्ती साफल्यं भजति । अस्मिन् आश्रमे प्रतिष्ठतस्य जनस्य शारीरिकी मानसिकी च स्थितिः सम्यग्व्यवस्थिता विकसिता च भवति । वेदे गृहस्थाश्रमोपदेशः तथा च स्त्री पुरुषयो :

समानाधिकारः

मानव समाजस्य मूलभूत आधारो गृहस्थाश्रमं एवहि । एव हि आलम्बः सर्वोन्नतीनां प्रश्रयः ममाप्र सुखः सम्पदाम् । एतदाश्रमस्योत्कर्षेणैव हि सिद्ध्यति । मनुष्याणां शारीरिकी, आध्यात्मिकी, मानसीचोन्नतिः । वेदे स्त्री पुरुषयोः समानाधिकार उपदिष्टो विभाव्यते । यानि कार्याणि स्त्रियः साधयन्ति तानि तानि पुरुषा अपि साधयितुं न समर्थाः । स्त्रीपुरुषयोः शिक्षा-दीक्षा च

पितृभ्यां समानभावेन सम्पादनीयेति वेदनिर्देशः । वैदिक संस्कृति प्रसिद्धेषु षोडश-संस्कारेषु खलु विवाहः प्रधानतमः । विवाहो हि नाम दम्पत्योः कोप्यविच्छेदो ग्नि साक्षिकः सम्बन्धो मैत्रीभाव रूपो मन्त्रैर्नियन्त्रित पाणिग्रहणान्तरौ वधूवरौ ब्रूवाते –

समंजन्तु विश्वे देवा
समापो हृदयानिनौ ।
सम्मातरिश्वा सं धाता
समु देष्ट्री दधानौ ।।

## वेदांग साहित्यं तस्य जीवने महत्वंच

'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति[27] । इति मुण्डकोपनिषद् वाक्यानुसारेण शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषं चेति षट् वेदांगानि वर्तन्ते ।

छंदः पादौ तु वेदस्य
हस्तौ कल्पो थ पठयते ।
ज्योतिषामयनं चक्षुः
निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य
मुखं व्याकरणं स्मृतम् ।[28]

इत्यस्मिन् प्रकारेण पाणिनीय शिक्षायामेषां वेदांगनां परिगणनं कृतमवलोक्यते । तत्र इत्यपि प्रतिपादितं वर्तते यत् एतानि वेदस्य हस्तपादादिवत् विशिष्टरूपेण तस्य सहकारीणि सन्ति । यद्यपि वेदांगानि मूलतः वेदानामंगानि इव सहायतार्थमुद्भूतानि । किन्तु पश्चात् तानि स्वविकास परम्परायां लौकिकस्य संस्कृतस्य तद् वांग्मयस्य, तस्य च प्रतिपाद्यस्यापि सहायकानि अभवन्, इदानीं च वर्तन्ते । अथ संस्कृतस्य लौकिके वैदिके च उभयोरपि क्षेत्रयोः वेदांगानां महत्वं दृश्यते । यद्यपि वेदांगानां मूलबीजं (तै०उ० शि०व० १) शिक्षा कल्पोव्याकरणं-----(मु० उ० १।१।४) इत्यादिभिः वचनैः ज्ञायते ।

### शिक्षा :-

श्रुतिवांग्मये पि समुपलभ्यते, तथापि तानि व्यवस्थित वांग्मयरूपे श्रुति-वांग्मयादनन्तरं स्वास्तित्व प्राप्नुवन् । अतः अस्मिन् तानि स्मृति वांग्मयस्यान्तः

समागच्छन्ति स्मृति वाङ्मये च तेषां मूर्धन्यभूतं कालक्रमेण च प्रायः प्रथमं स्थानमस्ति। तान्याधारीकृत्य भूयसः स्मृति वाङ्मयस्य विकासः संजातः । यथा हि कल्पः तदंशभूतानि च धर्मसूत्राणि आधारी कृतानि । स्वविकसितरूपे सम्पूर्णस्य लौकिक संस्कृत वाङ्मयस्यापि सहायकरूपेण वेदांगानां संस्कृत वाङ्मये उच्चस्थानं वर्तते । तस्मादुक्तेषु शिक्षादिषु वेदांगेषु "शिक्ष्यते-वर्ण-स्वराद्युच्चारण विधिरुप दिश्यते, यथा सा शिक्षा" । तत्र वर्णः स्वरः - मात्रा- बलं- साम- संतान इत्युक्तः शिक्षाध्यायः" इति तत्र वर्णाः अकारादिः, स्वरा उदात्तादयः, मात्रा ह्रस्वादिः बलं स्थान प्रयत्नौ, सामनिषादादिः, सन्तानो विकर्षणादिः । एषामत्र- बोधनमेव शिक्षायाः प्रयोजनम् । इदानीं शिक्षा ग्रन्थाः त्रिंशत् संख्यका उपलभ्यन्ते । यथा याज्ञवल्क्य शिक्षा, वशिष्ट शिक्षा, कात्यायनी शिक्षा, पाराशरी शिक्षा, माण्डव्य शिक्षा, अमोघनन्दिनी शिक्षा, नारदीय शिक्षा, शौनकीय शिक्षा, गौतमी शिक्षा, माण्डूकी शिक्षा, पाणिनीय शिक्षा चेति ।

शिक्षादिषु वेदांगेषु वर्णस्वराद्युच्चारण प्रकारः यथा शिक्ष्यते उपदिश्यते वा सा शिक्षा । शिक्षाया अस्य स्वरूपेण तस्याः महत्वं स्वत एव प्रकाश्यते । वर्णस्वराद्युच्चारण प्रकारस्य ज्ञानेन विना वैदिक मन्त्राणामन्यस्य वा पाठः समुचित रूपेण तथा समीचीनतया न कर्तुं शक्यते । पुराकाले यदा वाङ्मयस्योपदेशः गुरु-शिष्य परम्परया मौखिक रूपेण एव क्रियमाण आसीत्, तदा तु उक्तस्योच्चारण प्रकारस्य ज्ञानेन विना वेदादि वाङ्मयस्य शुद्ध पाठः एवासंभवः फलतश्च इदानिमपि अशुद्धः पाठः दरीदृश्यते । प्रतिनिधिभूता उपलब्धाः प्राचीनतमाः अस्य वेदांगस्य ग्रन्थाः। विभिन्नानि प्रतिशाख्यानि एव मन्तुं शक्यते । यतः प्रत्येकं शाखायाः एकं स्वकीयं प्रतिशाख्यमासीत्, अतः एतेषामभिधानं एव "प्रति शाख्यं "जातम् । प्रतिशाख्येषु संहिता पाठ सम्बन्धिनां वर्णोच्चारण स्वरविधान-सन्ध्यादि-विषयाणां सांगोपांग विवेचनं वर्तते । संहिता पाठस्य पद पाठरूपे परिवर्तनस्य

विभिन्ना: नियमा: अपि अत्र सूक्ष्मतया वर्णिता: सन्ति । यतो त्र व्याकरण सम्बन्धिनोप्यनेक नियमा: वर्णिता: सन्ति । अत:एतानि व्याकरणस्याप्युद्गम स्थानानि मन्तुं शक्यते । वस्तुत: प्रातिशाख्येषु शिक्षा व्याकरणयो: वेदांगयो: प्राय: समन्वयो दृश्यते । अत एव एतयो: विकास परम्परायामप्यनयो: प्राय: समन्वय एव अतिष्ठत् । यत्फलस्वरूपमनन्तरं शिक्षा वेदांग व्याकरणवेदांगे एव, प्रायो न्तर्भूतं दृश्यते ।

शौनक प्रणीतं 'ऋक् प्राति शाख्यं' प्राचीनतमं प्रामाणिकं च मन्यते । येथा च अस्य नाम्ना एव ज्ञायते, इदं ऋग्वेदेन सम्बन्धमाधत्ते । अस्योपरि उवट प्रणीतं भाष्यं वर्तते । अस्य प्रतिशाख्यस्य प्रारम्भिके वर्गद्वये विष्णुमित्र प्रणीता 'वर्गद्वयवृत्ति' नाम्नी वृत्तिरपि दृश्यते ।

प्रातिशाख्येषु द्वितीयं महत्वपूर्णं प्रातिशाख्यं कात्यायन प्रणीतं'वाजसनेयि प्रातिशाख्यमस्ति' इदं कात्यायन प्रातिशाख्यमपि इत्युच्यते । शुक्ल यजुर्वेदेन सम्बद्धमिदमाचार्यं उवटेन अस्य भाष्यं कृतिमस्ति । अस्मिन् प्रातिशाख्ये पाणिनीय-अष्टाध्यायी गन्थे च अनेकेषु स्थलेषु साम्यं दृश्यते ।

तृतीयं प्रातिशाख्यं तु कृष्णयजुर्वेदीय तैत्तरीय संहिताया सम्बद्धं 'तैत्तरीय प्रातिशाख्यमस्ति ।' अस्य अनेकानि भाष्याणि अपि सन्ति । येषु माहिषयकृतं 'पद क्रम सदन' नामकं भाष्यं प्रसिद्धमस्ति । सामवेद सम्बन्धिषु प्रतिशाख्येषु 'पुष्प प्रणीतं', 'पुष्प सूत्रं' शाकटायन प्रणीतं ऋक्तन्त्रं प्रमुख स्त: । अथर्ववेद सम्बन्धिषु प्रातिशाख्येषु अथर्वं प्रातिशाख्यमपि प्रसिद्धमस्ति । अनेकानि विभिन्नानि

प्रातिशाख्यमपि प्र्ल्बिल्ब्ल्बिल्ब०० आधारी कृत्य अनेके शिक्षा ग्रन्था: प्रणीता: अभवन् । यथा- याज्ञवल्क्य शिक्षा, वासिष्ठी शिक्षा, कात्यायनी शिक्षा, पाराशरी शिक्षा, माण्डव्य शिक्षा, माध्यन्दिनी शिक्षा, प्रातिशाख्यप्रदीप शिक्षा, नारदीय शिक्षा, मा०डूकी शिक्षा, पाणिनीय शिक्षा इति । एतेषु शिक्षा ग्रन्थेषु पाणिनीय शिक्षा लोके वेदे च उपयोगिनी वर्तते । फलत: महत्वपूर्णा प्रचार बहुला चास्ति । एवं शिक्षा वेदांगस्य सम्पत्ति: विशालास्ति ।

कल्पसूत्राणि :
०००००००००००००००

याग प्रयोग: कल्प्यते समर्थ्यते वा स: कल्प: कल्प्यते समर्थ्यते यज्ञयागादि प्रयोगा यत्रेति तद्व्युत्पत्ते: कर्मकाण्डविधि प्रतिपादका ग्रंथा कल्पसूत्र इति पदेन व्यपदिश्यन्ते । कल्पसूत्रमिति श्रौत- धर्मसूत्राणां पारिभाषिकी संज्ञा । सूत्रग्रन्था अमी कल्पसूत्रनाम्ना पि व्यवह्रियन्ते । तत्र वेदविहित श्रुति प्रतिपादित-यज्ञ यागादि विधानतद्विवरण प्रतिपादका ग्रन्था: श्रुति मूलकत्वात् श्रौत सूत्राणि परिभाष्यन्ते । गृहाश्रमिणां जन्म प्रभृति मृत्युपर्यन्ता ये संस्कारादय: कर्तव्यविशेषा येषु विह्रियन्ते तानि गृह्यसूत्राणि। येषु पुन: पारमार्थिका: सामाजिका,राजनीति विषयकाश्च धर्मविशेषा उपदिश्यन्ते । तानि धर्मसूत्राणि पुराकाले शनै: शनै: यज्ञयागानुष्ठान प्रक्रिया जटिला जाता, तां सूत्ररूपेणावबोधयितुं अस्य कल्पसूत्रस्योद्भवो जात: । अनेन वेदांगेन विना श्रुतिप्रतिपादितानां यागादीनां कर्मणां यथा तथा रूपेण संपादनमेवा संभवन भविष्यत् । अतोऽस्य महती उपयोगिता वर्तते । वेदांगस्यास्य सम्यक् रूपेण विकासे जाते, अस्य चातुर्विध्यं जातं, यदनुसारेण कल्पसूत्राणि चतुर्विधानि सन्ति- श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्राणि च ।

श्रौतसूत्रेषु श्रौते श्रुति विहिते वा अग्नौ सम्पाद्यमानानाम् श्रौतानाम श्रुति विहितानां वा यज्ञयागादिकानां कर्मणा मनुष्ठान प्रकार: वर्णित: वर्तते । श्रौतसूत्र प्रतिपाद्या: चतुर्विधा: क्रिया: तासु सप्त हवि: संस्था अग्न्याधानम्, अग्निहोत्रम्, दर्शपौर्णमासौ चातुर्मास्यानि, आग्नायणेष्टि:, निरूढ पशुबन्ध: सौत्रामणीत्येता:। सप्तसोमसंस्थास्तु पुन: अग्निष्टोम: उक्थ्य:, षोडशी वाजपेय:, अतिरात्र:, आप्तोर्यामा राजसूय इत्येता विज्ञेया: । एवं गृह्यसूत्राणामपि पुन: सप्तधा पाकयज्ञा:, पितृयज्ञ:, पार्वणयज्ञ:, अष्टका यज्ञ:, श्रावणी यज्ञ:, आश्वयुषी यज्ञ:, आग्रायणी यज्ञ:, चैत्रीयज्ञश्चेतिरव्या: । एतान् चतुर्विध श्रौतयज्ञान् सप्त पाकयज्ञांश्चातिरिच्य गृह्यसूत्रेषु च पंचमहायज्ञान्तराणामपि वर्णनमुपलभ्यते ते च देवयज्ञ-पितृयज्ञ-भूतयज्ञ- ब्रह्मयज्ञ- अतिथि-यज्ञाश्चेत्याभिधाता: । एतेषु गृह्यसूत्रेषु गर्भाधानादारभ्यान्त्येष्टि पर्यन्ता: षोडश संस्कारा अपि प्रपंचिता: । स एष कर्मकलाप प्रसर: कल्पसूत्रेषु सावष्टम्भं विवृत्तौ बोद्धव्य: । श्रौत सूत्रग्रन्थेषु च सांख्यायनाश्वलायनाख्यौ द्वावति प्रसिद्धौ ऋग्वेदीय श्रौतसूत्रग्रन्थौ । शुक्ल यजुर्वेदस्य एकमात्र श्रौतसूत्रं कात्यायन श्रौतसूत्रमस्ति । कृष्णयजर्वेदस्य बौधायन श्रौतसूत्रमापस्तम्ब श्रौतसूत्रं, हिरण्यकेशि, सत्याषाढम् वा श्रौतसूत्रम् । वैखानस श्रौतसूत्रम् । भारद्वाज श्रौतसूत्रम्, मानवश्रौतसूत्रम्, वाराह श्रौतसूत्रन्चेति षट्सूत्राण्युपलभ्यन्ते । सामवेदस्य आर्षेय कल्पसूत्रं प्राचीनतमं मन्यन्ते । एतदतिरिक्तमस्य वेदस्य लाटयायन श्रौतसूत्रं, द्राह्यायण श्रौतसूत्रं जैमिनीय श्रौतसूत्रश्चेति श्रौतसूत्राणि सन्ति । अथर्ववेदस्य श्रौतसूत्रं वैतानश्रौतसूत्रमस्ति ।

गृह्यसूत्रेषु ऋग्वेदस्य आश्वलायन गृह्यसूत्रं शांखायन गृह्यसूत्रंचेति गृह्यसूत्रद्वयम् प्रसिद्धमस्ति । एतदतिरिक्तमस्य वेदस्य कौषीतकि गृह्यसूत्रमपि प्रकाशितं जातम् । पंच शांखायन गृह्यसूत्रेण सह बहु साम्यं धत्ते । शुक्ल यजुर्वेदस्य एकमात्रं पारस्कर गृह्यसूत्रं प्रसिद्धमस्ति । यस्य च अनेका व्याख्या उपलभ्यन्ते । कृष्ण यजुर्वेदस्य बौधायन गृह्यसूत्रं,

आपस्तम्ब गृह्यसूत्रं, हिरण्यकेशि गृह्यसूत्रं, भारद्वाज गृह्यसूत्रं, मानवगृह्यसूत्रं, काठक-गृह्यसूत्रंचेति गृह्यसूत्राणि सन्ति । सामवेदस्य गोभिल गृह्यसूत्रं, खादिरगृह्यसूत्रं, जैमिनि गृह्यसूत्रंचेति गृह्यसूत्राणि सन्ति । अथर्ववेदस्य एकमात्र गृह्यसूत्रं कौशिक -गृह्यसूत्रमस्ति । यस्मिन् प्राचीनाया भारतीय यातु विधाया पर्याप्ता सामग्री उपलभ्यते । धर्मसूत्र साहित्यमद्य पूर्णतयोपलब्धं नास्ति । उपलब्धेषु धर्मसूत्रेषु गौतम-धर्म सूत्रं प्राचीनतमं मन्यते । प्राचीनेषु धर्मकारेषु केवलं मनोरूल्लेख: अत्र वर्तते । किन्तु मनो: नाम्ना सम्बद्धं `मानवधर्मसूत्रं` यदाधारे मनुस्मृते रचना मन्यते, अधुनावधि उपलब्धं नास्ति । गौतमधर्मसूत्राति रिक्तान्युपलब्धानि धर्मसूत्राणि बौधायन धर्मसूत्रमापस्तम्ब धर्मसूत्रं, हिरण्यकेशि धर्मसूत्रं वशिष्ठ धर्मसूत्रंचेत्यादीनि सन्ति । उपलब्धानि शुल्वसूत्राण्यपि संख्यायां बहूनि न सन्ति । उपलब्धेषु शुल्वसूत्रेषु कात्यायन शुल्वसूत्रं प्रसिद्धमस्ति ।

सूत्रग्रन्थेषु यावन्तो यज्ञयागादयो वर्णिता दृश्यते । तेषु प्रधानतया पंच-यज्ञास्तु निस्तन्द्रतया नुष्ठेया तत्र यत्स्वाध्यायमधीते स ब्रह्मयज्ञ:, यद्देवानुदिदश्य हविर्जुहोति स देवयज्ञ: यत्पितृन् श्रद्धया चैति तर्पयति च स पितृयज्ञ:, यद् भूतान्युदिश्य भूमौ बलिमुपहरति स भूतयज्ञ:, यद ब्राह्मणान् भिक्षूनतिथीं च सत्करोति सो तिथियज्ञ: । तत्रापि संध्योपासनं गायत्रीजप: वेदाध्ययनंच प्रात: सायं तुल्वबलत्वेनाभिमतत्वादवश्य-मनुष्ठेय-मेवा परिहार्यत्वेनेति ।

इमानि धर्मसूत्राणि लौकिकाचार व्यवहार धर्म प्रतिपादकानि । धर्मसूत्रेषु प्राधान्येन वर्णाश्रमधर्म एव प्रतिपादित: दृश्यते । धर्मसूत्र ग्रन्थाश्च कृष्णयजुर्वेदीय शाखा सम्बन्धिन: सम्प्रति तेषु त्रयो विभागा एव समुपलभ्यन्ते । तथापि वेदान्त सम्बन्धिनो अन्यो पि तादृशा धर्मसूत्रग्रन्था: पुरा आसन् इति ग्रन्थान्तरेषु -

तेषामुद्धरणादेव गम्यते । धर्मसूत्रे प्राधान्येन ब्रह्मचारि गृहस्थधर्माः भोज्य पदार्थास्तपोमार्गश्च निरूपिताः । विवाहधर्मा दायाधिकारः दण्डनियम प्रभृति लौकिका विषया अपि प्रपञ्चिताः । ग्रन्थो यं प्राच आर्षशैल्यां निबद्धत्वात् ख्रिस्ताब्दीतः प्राक् चतुर्थ शतके विरचितः संभाव्यते । अपरो धर्मसूत्रग्रन्थः हिरण्यकेशीयः । साम्प्रदायिका हिरण्यकेशिशिखामिमां आपस्तम्बशाखोत्पन्नामेवाभि-मन्यते, न च स्वतंत्रशाखां एतस्मिन् सूत्रग्रन्थे यज्ञविशेषाः वर्णाश्रमधर्माः, राजधर्माः, दण्डविधानम्, साक्ष्यधर्माः, दायविभागप्रकारः विवाहप्रकारः स्त्रीणामधिकाराश्च निरूप्यन्ते । एवमन्येषामपि धर्मसूत्राणां नामानि ग्रन्थान्तरेषु समुपलभ्यमानानि लोचनपथम वतरन्ति । तानि तु तत्र तत्रैव परिमर्शनीयानि । ग्रन्थ कलेवर वृद्धिभयात् नात्र प्रपंचयन्ते । तदित्थं वैदिक वांगमये कल्पसूत्राणां पदमतीव वैशिष्ट्यमावहति । कल्पसूत्राणि हि वैदिक कर्मकाण्डमशेष विशेष वर्णनपुरस्सरं परिमण्डयन्ति । तद् रहस्य बोधने चातीव साहाय्यमाचरन्ति । अथ वेदप्रतिपादिताखिल कर्म प्रतिपत्त्यर्थं ब्राह्मणग्रन्थानामुदयः । ब्राह्मणग्रन्थेऽपि वर्णितानां वस्तुतत्त्वानां विशदीकरणार्थं कल्पसूत्राणामुदय इति हेतोरेव तेषामपि वेदांगत्वेनांगीकारः । प्राचीनानि कल्पसूत्राणि तु वैदिक कर्मकाण्ड परिरक्षणार्थमेव प्रवृत्तानीति संभाव्यते । तेषां प्रादुर्भावोऽपि बौद्धमताविर्भाव कालिक एव इति तर्क्यते ।

## व्याकरणम्

येन शब्दाः प्रकृतिप्रत्ययाद्युपदेश रूपे व्याक्रियन्ते तन्नाम व्याकरणम् । प्रकृति प्रत्ययाद्यनुशासनेन पदस्वरूप निर्णयाय तदर्थ निर्धारणाय च व्याकरणस्य परमोपयोगः । पद पदार्थावि बोधो नहि व्याकरणमन्तरा नहि संभवितुं शक्यते । व्याकरणेन शब्दानां प्रकृति पत्थयाद्युपदेशे कृते समान प्रकृतिकाः समान प्रत्ययकाश्च शब्दाः युगपदेव लाघवेन ज्ञाताः संभवन्ति । यानि व्याकरणस्य विभिन्नानि प्रयोजनानि संभवन्ति । तानि वार्तिककारेण "रक्षोहागमलघ्व संदेहा : प्रयोजनम्" इत्यस्मिन् वार्तिके प्रदर्शितानि । व्याकरणस्य एतानि रक्षादीनि प्रयोजनान्यन्यानि च कतिचन प्रयोजनानि पतंजलिना स्वप्रणीते महाभाष्ये स्पष्टीकृतानि । एतैर्विभिन्नैः प्रयोजनैर्सीयते यत् व्याकरणस्याध्ययनमहदावश्यकं वर्तते । अस्य व्याकरण वेदांगस्य बीजं विभिन्नेषु प्रातिशाख्येषु उपलभ्यते । तत्र वैदिकस्य व्याकरणस्य अनेके नियमाः वर्णिताः सन्ति, यदाधारेणानन्तरं संस्कृत व्याकरणस्य विकासः जातः । अस्य वेदांगस्य विकास परम्परायां सूत्रात्मिका पाणिनीया अष्टाध्यायी प्रमुखरूपेण विराजते । यत्र वैदिकं लौकिकं च व्याकरणमुपलभ्यते ।

पाणिनेय पूर्वमप्यनेके वैयाकरणाः अभवन् । किन्तु तेषां ग्रन्थाः अधुना नोपलभ्यन्ते । फलतः पाणिनीय व्याकरणमेवोपलब्धं प्राचीनतम व्याकरणमस्य वेदांगस्य प्रतिनिधिभूतं रत्नमस्ति । पाणिनिसूत्रेषु कात्यायनेन वार्तिकानां पतंजलिना च भाष्यस्य रचना कृता । पतंजलेर्भाष्यं स्वगौरवेण हेतुना "महाभाष्यम्" इति उच्यते । पाणिनी कात्यायन पतंजलि इति मुनित्रय विरचितानि एतानि सूत्र वार्तिक भाष्याणि व्याकरणस्याधारभूतानि सन्ति । तदनन्तरमेषामेवसिद्धान्त

प्रकाशन रूपे व्याख्यानुव्याख्यान रूपे च व्याकरणस्य महान् विकास: महती सम्पत्ति: चाभवत् । अस्यां साहित्य सम्पत्तौ भर्तृहरि विरचितं वाक्यपदीयं वामन जयादित्य विरचिता काशिकावृत्ति: , जिनेन्द्रबुद्धि विरचित: न्यास:, हरदत्त विरचिता च पदमंजरी, महाभाष्यस्य कैयट प्रणीतं 'प्रदीप' नामकं व्याख्यानम्, तस्य च नागेशविरचित मुद्योग नामकं व्याख्यानम्, रामचन्द्राचार्य विरचिता प्रक्रिया कौमुदी भट्टोजि दीक्षित विरचिता सिद्धान्त कौमुदी तस्याश्च टीका परम्परायां मनोरमा शब्देन्दु शेखरादय: टीकाग्रन्था: सन्त्येव वैयाकरणभूषणसार लघु मंजूषा परिभाषेन्दु-शेखरादयश्च ग्रन्था: प्रसिद्धा: सन्ति । तानीमानि पुनर्व्याकरणानि नव सन्ति । इति लघु-त्रिमुनि कल्पतरुकार लेखनेनानुमीयते ----

ऐन्द्रं चान्द्रं काश कृत्स्नं
कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं
पाणिनीयकम् ।।

तद् यथा भविष्यपुराणे व्याकरण नामष्टकत्वमेव निरूपितं वर्तते ।

प्रथमं प्रोच्यते ब्राह्मं,
द्वितीयमैन्द्रमुच्यते ।
याम्यं प्रोक्तं ततो रौद्रं
वायव्यं वारुणं तथा ।
सावित्र्यं तथा प्रोक्तम्
अष्टमं वैष्णवं तथा ।

एवं वेदांगेषु व्याकरणं अतीव महत्वपूर्णमिति स्पष्टम् ।

निरुक्तम् :

यत्र व्युत्पत्ति प्रदर्शन द्वारा शब्दानामर्थं प्रकाशनं क्रियते अर्थात् मन्त्र शब्दा निरूच्यन्ते तन्नाम निरुक्तम् । निरुक्तस्य सहाय्येन एव वेदमन्त्र प्रयुक्तानां शब्दानामुक्त प्रकारकं निर्वचनं कर्तुं शक्यते, तदाधारेण चान्येषामपि शब्दानां निर्वचनं संभवितमास्ति । एवं च शब्दानामर्थज्ञातायास्योपयोगित्वं दरीदृश्यते । अस्य निरुक्तस्यैक मात्र प्रतिनिध्यं यास्काचार्यस्य । यद्यप्यनेन निरूक्तस्यावलोकनेन ज्ञायते यदस्मात् पूर्वमप्यनेके निरूक्तकारा जाता:, किन्तु तेषां ग्रन्थ इदानीं नोपलभ्यते । महर्षि यास्क प्रणीतं निरूक्तं कश्यम प्रजापति प्रणीतं निघण्टु व्याख्यारूपमस्ति । निघण्टोरेकं निघण्टु निर्वचनमित्याख्यं भाष्यमपि देवराज यज्व प्रणीत मुपलभ्यते । निरुक्तस्यापि कतिपयाष्टीका: समुपलभ्यन्ते । यासु टीकासु स्कन्दमहेश्वरस्य निरुक्त भाष्यटीका दुर्गाचार्यस्य दुर्गवृत्तिश्च प्रमुखे स्त: । अस्य वेदांगस्याधिकं साहित्यं नोपलभ्यते, तत्र कारणद्वयं संभाव्यते - एकं त्वस्य भूयस: साहित्यस्य लोप:, द्वितीयं च यास्क प्रणीतात् निरुक्तात् तदनन्तरमस्य वेदांगस्य निर्वचन रूपकार्यस्य व्याकरणेन परिग्रहणं तथा निरुक्तं व्याकरणे एवान्तरभवत् । निरुक्ते स्मिन् वेदार्थज्ञान सौकर्यापियिका: प्राय: सर्वं एव विषया निरूपिता: ।

प्रथमाध्यायस्तु तदेतस्य भूमिकारूप: । तत्र निघण्टु घटित शब्दार्थं वचनान्येव पल्लवितानि । द्वितीय तृतीयाध्याययो निर्वचन पद्धति पुरस्सरं नैघण्टुक काण्ड व्याख्यानम् ।

ततश्चतुर्थाध्यायादारभ्य षडध्याय पर्यन्तं देवता तत्वावबोध पुरस्सरं दैवतकाण्ड व्याख्यानम् । तत: परं प्रथम परिशिष्ट रूपे त्रयोदशाध्याये आत्मतत्वोपदेश-पराणां वचनानां निर्वचन व्याख्यानानि । चतुर्दशाध्याये द्वितीय परिशिष्ट भागे पुन:

परम पुरुषार्थ साधनानि निर्वचन व्याख्यानाभ्यां प्रपंचितानि । केषान्चित मते वास्तविक निरूक्तं तु किल द्वादशाध्यात्ममेव । अन्तिमौ द्वावध्यायौ तु पश्चात्केनापि संयोजितौ । सत्यपि अस्य निरुक्तस्य निघण्टुभाष्य रूपत्वे सर्वेषामेव शव्दानां व्याख्यानं कृतमवलोक्यते । किन्तु निदर्शन दिशा अल्पीयसामेव शव्दानां व्याख्यानं कृतमवधार्यतो केवलं व्याख्यान सरणि प्रदर्शनार्थमेव । नैघण्टुक प्रकरणे पृथिव्या एकविंशति नामानि सन्ति । परन्तु तेषु गौरित्येकमेव शव्दमुद्दिश्य विवरणं विहितमन्येषां नामोल्लेखो पि न दृश्यते ।

छंद: शास्त्रम् :

छंद: शास्त्रं वेदांगेषु अतीव गौरवशालि वर्तते । वेद: प्राय: छंदोमय एव वर्तते । छंदशास्त्रमिदं हि किलाखिल काव्य प्रपंचस्य प्रसव भूमि: सांगोपांग हि भगवती श्रुति: कामधुग्भवति । वैदि वेदे पि काव्यस्यामरत्वं समाम्नातं यश्य देवस्य काव्यं न ममार न जीर्यति इति तावता श्रुतिरपि छन्दो निबद्धा काव्यमयी वागित्यभिहितं भवति । काव्यं तु गद्यं पद्यं तदुभयमितिभेदात् त्रिधा भवति । "छंद: पादौ तु वेदस्य" इति प्रतिपादितं शिक्षायां तद्हेतोरेव पिंगलाचार्यै - छंद शास्त्रस्य द्विविध्यं सूत्रितं लौकिकं वेदिकंचेति छंद शास्त्रस्यावतरण विषये यादव प्रकाशाभिधायां छन्द सूत्रटीकायां समुपश्लोकितं वर्तते —

छंदोज्ञानमिदं भवाद् भगवतो
लेभे सुराणां पति:
तस्मात् दुश्च्यवनस्तत: सुरगुरु:
माण्डव्यनामा तत: ।
माण्डव्यादपि सूतवस्तत ऋषि :
यास्कस्तत: पिंगल :
तस्येदं यशसा गुरोर्भुवि धृतं
प्राप्यास्मदाद्यै: कृतम् ।।

देववाणी यथा पद्यात्मिका तथैव लौकवाण्यपि पद्यात्मिका । छंदोविशेषसे बैह्व छंदो ग्रन्था विरचिता: । अस्य वेदांगस्य विकास परम्परायां प्राय: एतादृशा ग्रन्था: प्रणीता जाता । येषु लौकिकानामपि छंदसां वर्णनमस्ति ।

छंदशास्त्रस्य ग्रन्थेषु सर्वप्रथमतया पिंगल मुनि प्रणिबद्धं प्रसिद्धात्मकं तन्नामकं पिंगलसूत्रमिति प्रकटितम् । आचार्य पिंगलमुनिना स्वीये छंद: सन्दर्भ तत्प्राक्तनच्छन्द: शास्त्र प्रणेतृणां नामानि न प्रणीतानि इदानीमपि न तेषां को पि संदर्भ: सुलभोपलम्भ: । सम्प्रति प्राप्तेषु छंदो ग्रन्थेषु पिंगलाचार्यकृतं पिंगलसूत्रमेव प्राचीनतमं वेदांगत्वेन स्वीकृतं प्रसिद्धंच । न केवलमत्र वैदिक छंदसामेव विवरणं समुपलभ्यते । अपितु लौकिक छंदसामेव विशदोपदेश: कृतो व लोक्यते । यद्यपि केश्चनाचार्यै: पिंगलाचार्यो यं पाणिनैरनुज:, इति प्रतिपादितम्, परं कालविदस्तु स्वयं पतंजलिरेवायं पिंगलाचार्य इति मतमुपस्थापयन्ति । अस्य ग्रन्थस्य सूत्ररूपत्वादयं सूत्रकाल एव निर्मितं संभाव्यते । पिंगलसूत्रमिदमष्टाभिरध्याये रूपनिबद्धं वर्तते । तत्र प्रथमाध्याये मात्रागणनोपदेश: निरूपणं वर्तते । द्वितीये तृतीये ध्याये च वैदिक छंदसां विवरणमायां वैतालीयादि विवृतिश्च दृश्यते । पंचमे षष्ठे च पुनर्विषमवृत्त, समवृत्तादि निरूपणं कृतं वर्तते । सप्तमे ध्याये च त्रयोदशाक्षरमितात्पादा दारभ्य षड्विंशाक्षरमित पादानां छंदसां परिचय: । अष्टमे च गाथा प्रस्तरादीनां विशदं वर्णनमुपगुम्फितं दृश्यते । यद्यपि पिंगल सूत्रस्य चतुर्दश टीका: श्रूयन्ते तथापि तासु हलायुध कृत मृत संजीविनी नाम्नी टीका सुप्रसिद्धा प्रशस्ता च । विद्धद्वर केदार भट्ट प्रणीतो न्य प्रसिद्ध तमश्छंदोग्रन्थ: वृत्तरत्नाकरो नाम । अस्य ग्रन्थस्य प्रसिद्ध टीकाकारेण मल्लिनाथेन स्वटीकासु प्रायशो वृत्तरत्नाकरस्यैव लक्षणानि समुल्लिखितानि । अतोस्य निर्माणकाल: ख्रैस्तत्रयोदश शतकानन्तरमेव संभाव्यते । अस्य कविवरस्य जनक: शेवागमपारदृश्वा काश्यप

वंशावतं सो भट्टवर: श्री पेव्वको नाम महापण्डित आसीत् । वृत्तरत्नाकरो यं षडध्यायैर्निबद्ध: छंद:शास्त्र संदर्भो निखिल विषयालंकृत: । विलसन्ति चास्य पंचविंशति टीकातो प्यधिकाष्टीका:, तत्र नारायण भट्ट कृता सर्वोत्कृष्टेति विदुषां सम्मति: । नारायण भट्टो यं ख्रिस्ते १५४५ तमे ब्दे विराजते स्मेति । अन्य एक: प्रसिद्धो ग्रन्थो विद्वद्वर गंगादास प्रणीतो छंदो मंजरी ग्रंथो पि विलसति। अस्य ग्रन्थस्य निर्माणकाल: अष्टादशशताब्दा उत्तरार्द्धं क्वचिन्निर्धार्यते । ग्रन्थो यं षट्स्तबकैर्निबद्ध: । अन्ये पि छंदशास्त्रस्य बह्वो ग्रन्था: समुपलभ्यन्ते । यथा कविराज हेमचन्द्रकृतं छंदो नुशासनमित्यादय: । परमेतेषु ग्रन्थेषु लौकिक छंदसामेव निरूपणमस्ति न खलु वैदिक छंदसाम् । पिंगलसूत्रे तु पुरश्छंदस छंदसां गायत्री, उष्णिगनुष्टुप, बृहती, पंक्ति, त्रिष्टुप, जगती, प्रभृति समाख्यानां विशदं विवरणं पल्लवितं दृश्यते । चतुर्विंशत्यक्षरा गायत्री, अष्टविंशत्यक्षरा उष्णिग्, एवमुत्तरोत्तराधिकाक्षर संवलितानि अनुष्टुबादीन्यनेकानि छंदांसि बोद्धव्यानि । इत्थमेतेभ्य: सप्तछंदोभ्य: तदवान्तर भेद भिन्नानि भूयांसि अति जगती, शक्वरी, अतिशक्वरी, अष्टि, अत्यष्टि, धृति, अतिधृति, कृति, प्रकृति, विकृति, संस्कृति, अभिकृति, उत्कृति प्रभृति समाख्यानि छंदांसि संभवन्ति । वेदावबोधाधिजिज्ञासूनां छंदोज्ञानं परमावश्यकम् ।

छंद: शब्दो यं वृत्तपदेना पि व्यपदिश्यते । तत्र ह्रस्व-दीर्घ-मात्रा घटितो -ष्टाक्षरैर्बद्धो वर्ण समूह: पाद उच्यते । एवं विधैस्त्रिभि: पादैर्घटितं छन्दो गायत्री इत्युच्यते । चतुर्भिर्पादैर्घटित मनुष्टुबुच्यते । अस्यां प्राथमिकं पादद्वयमुत्तरेण पादद्वयेन सह साम्यात्त्वं भजते । इदमेव अनुष्टुप छन्द: कालान्तरेण लौकिक छन्दस्सु लब्धादरं दशाक्षरनिबद्धं पाद चतुष्टय युक्तं छंदो जगतीति उच्यते । एकादशाक्षरात्मकं पादचतुष्टय प्रणिबद्धं छंदस्त्रिष्टुबुच्यते । ऋग्वेदस्य प्रत्येकं सूक्तं भूयसा सजातीयैरेव छंदोभि: प्रणिबद्धम् । किन्तु सूक्तानामन्ते सूक्त विरामावबोधनाय विजातीयान्यपि छंदांसि प्रयुक्तानि दृश्यन्ते । एवं जातीया: छंदोबद्धमन्त्रा कुन्तकादिरूपा अपि समुपलभ्यन्ते ।


मुहूर्त ग्रन्था:
प्रश्न ग्रन्था:
नष्ट जातक ग्रन्था:
पंचांग ग्रन्था:
ताजिक ग्रन्था:
जातक ग्रन्था:
होरा
गृहचार वश शुभाशुभ फलम्
वास्तु ग्रन्था:
शकुन ग्रन्था:
वस्तु समर्घ महर्घ विचार:
अद्भुत
लक्षण ग्रन्था:
वृष्टि विचार ग्रन्था:
सामुद्रिक शास्त्र ग्रन्था:
अंग स्फुरण शुभाशुभ फलम्
शांति ग्रन्था:
स्वर ग्रन्था:
पल्लि पतन विचार:
स्वप्न शास्त्रम्
संहिता
गोलीय रेखागणितम्
त्रिकोण मिति:
चापीय त्रिकोण मिति:
रेखा गणितम्
प्रतिभा ज्ञानम्
गोला ध्याय:
चलन कलन विषया:
बीज गणितम्
पाटी गणितम्
ज्योत्पत्ति विषया:
करण ग्रन्थ राशयः
सिद्धांत
ज्यौतिषम्
ऋग्वेद
यजुर्वेद
सामवेद
अथर्ववेद
उपनिषद
पुराणादि
ब्राह्मण

॥ ज्यौतिष कल्पवृक्षः ॥

प्रसिद्धो भूलोके सकलविधिवाञ्छा वितरकः ,
सुरद्रुर्देवेन्द्र प्रवित तवनेऽसौ न भुवने ।
इदं ज्योतिःशास्त्रं सकलजन सर्वेष्ट दतया ,
सुलभ्यः कल्पद्रुर्भुवि दिविच जागर्ति सततम् ॥ १ ॥

विना ज्योतिःशास्त्रं न हि किमपि विज्ञैरपि जनैः ,
प्रवेत्तुं शक्यन्ते वियति खगविज्ञान विषयाः ।
जगत्तत्वं भूमौ गिरिपुरनदीद्वीपवलयाः ,
विना पुण्यैर्यद्वन्न भवति गतिर्नाक नगरे ॥ २ ॥

इदं ज्योतिःशास्त्रं श्रुतिनयनरूपं सुविदितं ,
दिनेशैर्लोकेशैः प्रथममरचि प्राज्ञसुमतम् ।
जगज्जालं त्वेतद् ग्रथितमखिलं त्वस्ति विततं ,
विविच्यैतां नान्यत्परमिति परावश्यकमिह ॥ ३ ॥

समस्तं शब्दादि प्रमितकृत सूत्रार्थजनितं ,
त्विदं भिन्नैर्भिन्नैर्विषम विषयैरस्ति भरितम् ।
जनैरध्येतव्यं नहि सरलमन्दैः सुकठिनम् ,
यतः पाठ्यं दर्भाग्रसदृशधिया धारधिषणैः ॥ ४ ॥

— x —

किम् नाम ज्योतिषशास्त्रं ? किं स्वरूपं तद् ? इत्यपेक्षायाम् ज्योतिष शब्दस्य व्यु-पत्ति पूर्वकं विवेचनं क्रियते -

(१) 'ज्योतिस' शब्दस्य अर्थः : आप्टे, महोदयैः एवं कृतो स्ति -

(२) ज्योतिःशास्त्रम् । ज्योतिर्विद्या =

(३) ज्योतिषम् - व्याकरणशास्त्रदृष्टया अस्य शब्दस्य व्युत्पत्तिः एवं क्रियते -
अर्श आदिभ्यो च (पाणिनी- ५-२-१२७)
इत्यनेन सूत्रेण ज्योतिस् +अच् (सकारस्य षत्वे कृते- )
ज्योतिष+अच् (चकारस्य लोपे जाते-)
ज्योतिष्+ अ = ज्योतिष

नपुंसकलिंगविवक्षायां 'ज्योतिषम्' इति रूपं सिद्धयति । अनया व्युत्पत्या 'ज्योतिष' शब्दस्य अर्थः : एवं निरूप्यते -'सूर्यादिग्रहादिकं प्रतिपाद्यतया अस्ति अस्य' इति ।

वाल्मीकीये रामायणे अपि एवं रूपः अर्थः वर्तते-'कलामात्र विशेषज्ञाज्योतिषे च परंगतान्'

(वा०रा० ७-६४-७)

(४) शुद्धरूपेण तु 'ज्योतिषम्' इति रूपः शब्दः शास्त्रेषु दृश्यते । अथ क्वचित ~~शब्दः--शास्त्रेषु~~ क्वचित् 'ज्योतिषम्' इति शब्दोऽपि प्रयुक्तो दृश्यते । तस्य समाधानं क्रियते एवम् प्रज्ञादिभ्यश्च (पाणिनि -५-४-३८)
अनेक सूत्रेण स्वार्थे अण् प्रत्ययो भवति- यथा
प्रज्ञः एवं प्राज्ञः (प्रज्ञ-अण्
(विज्ञान्)(विद्वान्) । प्रज्ञ+ अ
(प्राज्ञ

एवं ज्योतिष + अण्

ज्योतिष + अ

ज्योतिषम् -

एवं ज्योतिषम् एवं ज्योतिषम् इति अपरं रूपमपि साधयितुं शक्यते इति अलम् ।

(५) महर्षियास्क विरचिते निरुक्तशास्त्रे द्वितीयाध्यायस्य प्रथम पादे तृतीय खण्डे (२.१.३) ज्योतिः शब्दस्य व्युत्पत्तिरेवं दत्ता स्ति - 'अथापि आदिविपर्ययो भवति ज्योतिर्घनो विन्दुवांस्य इति ।' टीकाकृत् दुर्गाचार्यो ज्योतिः शब्दस्य प्रक्रियां व्युत्पत्तिदृष्ट्या एवं दर्शयति - तस्माद्युते रिसिन्नादेशश्च ज । (द्युत दीप्तौ भ्वा.आ.)

द्युत + इसिन्

(द्युत् + इसिन) (आदिविपर्ययेण 'द' कारस्य स्थाने 'ज' कारे कृते)

ज्युत् + इसिन्) ('इसिन' इत्स्मात् सकारोत्तर वर्ति इकारस्य ('न' कारस्य च लोप)

ज्युत् + इस् (उपधागुणो कृते - )

ज्योत् - इस्

ज्योतिषस्

ज्योतिः (इति ज्योतिः शब्दस्य व्युत्पत्ति)

॥ ज्यौतिषम् ॥

'ग्रहगणितं ज्यौतिषम्'[१] यज्ञानुष्ठानकालनिर्णयी वर्तते, यत्तन्नाम ज्यौतिषम् । यथार्थं कालनिर्णयमस्य वेदांगस्यैषावम्बेन ज्ञातुं शक्यते । एवमेवान्येषामपि विभिन्नानां वैदिकानां लौकिकानां च कर्मणां कालज्ञानायेदं वेदांगमपेक्षितं भवति । ज्यौतिषशास्त्रमिदं वेदांगेषु नितरां गौरवशालि । तदिदं ज्यौतिषं नाम कालविज्ञापकं शास्त्रम् । उक्तं च -

> वेदा हि यज्ञार्थमभिप्रवृत्ताः
> कालानुपूर्वा विहिताश्च यज्ञाः ।
> तस्मादिदं कालविधान शास्त्रं
> यो ज्यौतिषं वेद स वेद य ज्ञान् ॥[२]

शुभ मुहूर्तमनुगृह्य क्रियमाणा यज्ञयागादिक्रिया- विशेषाः फलाये कल्पन्ते न तु यदृच्छाया सम्पाद्यमानाः । तन्मुहूर्तज्ञानंच ज्यौतिषमनन्तरा न संभवतीति हेतोरेवास्य यज्ञांगत्वं प्रकल्पितं महर्षिभिः । वेद चतुष्टयस्यापि प्रतिवेदं भिन्नमुपलभ्यते ज्यौतिषशास्त्रं । ऋग्ज्यौतिषम्, यजु ज्यौतिषम् अथर्वज्यौतिषचेति । तत्र ऋग ज्यौतिषम् षट्त्रिंशच्छ्लोकरूप निबद्धं वर्तते । याजुषज्यौतिषमूनचत्वारिंशत् पद्यैरलंकृतम्, आथर्वण ज्यौतिषंच पुनः द्विषष्ट्युत्तरशतमितं पद्य सम्मितम् । त्रय एव ज्यौतिष ग्रंथाः समुपलभ्यन्ते । साम ज्यौतिषं तु लुप्तप्रायम् । एतेषां प्रणेतृत्वेन तु कश्चिद महामुनिः लगधाचार्यः प्रख्यायते । ततो स्य वेदांगस्य प्राचीनतमो ग्रंथो लगध प्रणीतं 'वेदांग ज्यौतिषम्' प्रसिद्धमस्ति । अस्य ऋग्वेद सम्बंधी च भागः याजुषसम्बंधी च उच्यते । अस्य ग्रन्थस्यार्थं भावविातीव गुठो स्ति, यस्य प्रकाशनाथ शंकर बालकृष्ण दीक्षित लोकमान्य -

तिलकादिभिरनेकैर्विद्वद्भिः प्रयत्नः कृतो ऽस्ति । अपरांचास्य भाष्यं सुधाकर प्रणीतमस्ति । अस्य वेदांगस्य विकास परम्परायामनेकेषां ग्रंथानां रचना जाता, येषु सिद्धान्तशिरोमणि ग्रहलाघवादयः प्रसिद्धाः सन्ति । यद्यपि ज्योतिषशास्त्रमतीव विशदं वर्तते । तत्र सूर्य पितामहादि प्रोक्ताः सिद्धान्त ग्रंथाः, गौरिकाल जातकाद्यो दैव ग्रन्थाः, पाराशरी जैमिनि सूत्रादयः आर्षग्रन्था, आर्यभट्ट कृत पौरुष ग्रंथाः वैदिक ज्योतिषसंहिता प्रभृतयश्चेति महीयान् साहित्य प्रसरोऽवलोक्यते । अस्य वेदांगस्य प्रवर्तका अष्टादशमहर्षयः यथा –

काश्यपमतानुसारेण यथा –

सूर्यः पितामहो व्यासो वसिष्टोऽत्रि पराशरः
कश्यपो नारदो गर्गो मरीचिर्मनुरंगिशः ।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः
शौनको ऽष्टादशाश्चैते ज्योतिः शास्त्र प्रवर्तकाः ।।[3]

पराशर मतेन एकोनविंशति ज्योतिः शास्त्र - प्रवर्तकाः स्युः । यथा –

विश्वसृ्, नारदो व्यासो वसिष्टोऽत्रि पराशरः
लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः ।
पुलस्त्यो मनुराचार्यः पौलिशः शौनको ऽङ्गिराः
गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः[4] ।।

पराशर मतानुसारेण गुरु- शिष्य परम्परा, यथा –

नारदाय यथा ब्रह्मा शौनकाय सुधाकरः ।
माण्डव्यवामदेवाभ्यां वसिष्टो यत्पुरातनम् ।।
नारायणो वसिष्टाय रोमेशाया पि चोक्तवान ।
व्यासः शिष्याय सूर्यो पि महारूणाकृते स्फुटम् ।
पुलस्त्याचार्य गर्गो त्रि रोमकादिभिरीरितम् ।
विवस्वता महर्षिणां स्वयमेव युगे युगे ।।
मैत्रेयाय मयाप्युक्तं गुह्यमध्यात्मसंज्ञकम् ।
शास्त्रमाद्यं तदेवेदं लोके यच्चाति दुर्लभम्[5] ।।

तत्र ज्योतिषशास्त्रस्य प्रसिद्धाचार्यः श्रीमान् वराहमिहिरेण स्वकीय बृहत्संहितायामुपवर्णितम् यथा —

ज्योतिः शास्त्रमनेकभेद विषयं स्कन्धत्रयाधिष्टितं
तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।
स्कन्धे्स्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधान स्त्वसौ
होरान्यो गविनिश्चयश्च कथितः स्कन्धस्तृतीयो परः[6] ।।

अयं ज्योतिषशास्त्रज्ञो वराहमिहिरः ख्रैस्त ६०० शतक सम्भवः, आदित्यसात्मजः, अवन्ति वास्तव्यः, प्रकाण्ड ज्योतिषपंडितः, प्रसिद्धान्तिका- विवाहपटल- बृहज्जातक लघुजातक-बृहत्संहितादि ग्रन्थानां प्रणेता । आचार्य आर्यभट्टस्तु वराहमिहिरात्प्राग्भवः ख्रैस्त पंचमशतक सम्भवः, आर्यसिद्धान्त प्रवर्तकः कुसुमपुर वास्तव्यः आर्यभट्टीयस्य प्रणेता। आर्यभट्टीयाख्यो ग्रन्थः सम्प्रति प्राप्तेषु ग्रन्थेषु प्राचीनतमः । आचार्य ब्रह्मगुप्तोदयं ब्राह्मस्फुट सिद्धान्तस्य खण्डनखाद्यस्य ध्यानग्रहस्य च रचयिता अयं गुर्जर श्रीमाली ब्राह्मणः

भिन्नमाल निवासी श्री जिष्णुदेव तनूज: । सो यमाचार्य: चापोत्कूटवंशीय व्याघ्रमुखराज कालिकश्च संभाव्यते । भोजदेव: ११०० तमे ऽब्दे धृतावतार: राजमृगांककरणस्य रचयिता, धाराधिप: संस्कृत वाङ्मय प्रणायी संरक्षकश्च । भास्कराचार्य: ख्रैस्ते: ११६४-१४०० तमाऽब्दे मध्यकाल भवोऽयम् । सिद्धान्त शिरोमणि, करणकुतूहलकर्ता ग्रहगणित गोलाध्याययोश्च वासनाभाष्यस्य प्रणेता शाण्डिल्यगोत्रीयो महेश्वर सूनु: । दक्षिण भारते खानदेशे सह्याद्रि निवासित: स्थिते विज्जलविड ग्राम निवासिन: गणकाग्रसर: निकट वर्तिव विद्वत्कुल शिरोमणि: आसीत् । एतदतिरिक्ता अन्ये पि लघु - बृहत्-पाराशरी जैमिनीयसूत्रम्- भृगुसंहिता- मन मीनराज जातक नाडीग्रन्थ: प्रभृतय: ज्योतिष विषयका आर्षग्रन्था अपि समुपलभ्यते । एवं वराहमिहिर प्रणीते लघु बृहज्जातके कल्याणवर्मणा: सारावलि:, ढुण्ढिराजस्य जातकाभरणं, अनन्तस्य जातकपद्धति:, नृहरे: जातकसार:, गणेशस्य जातकालंकार:, दिवाकरस्य पद्मजातकं, बलभद्रस्य होरारत्नं, गोविन्दस्य होराकौस्तुभं सन्ति ग्रन्था: प्रसिद्धा: । एवमेव केरलमत प्रतिपादका: ग्रन्था: प्रश्नज्ञानसदृशा:, ब्राह्मणग्रन्था:, रमलचिन्तामणि, रमलामृत सदृशा: रमलग्रन्था:, ताजिकभूषण पद्धति:, ताजिक-तन्त्रसार:, ताजिक-पद्धति:, ताजिक नीलकण्ठी त्यादयो ग्रन्थाश्चापि प्रसिद्धा एव। आचार्य वाराहमिहिरस्य कालादनन्तरं संहिता स्कंधस्थ संहिता ग्रन्थानां विषयान्तरेषु मुहूर्तस्यैव भूयसा प्राधान्यं जातमिति । इति हेतोरेव तत: परमावतीर्णानां मुहूर्तग्रन्थानां संहितास्कंध एवान्तर्भाव: संजात: । तत्र च लल्लाचार्य विरचितो रत्नकोश: श्रीपतिकृता रत्नमाला, केशवप्रणीतो विवाह वृन्दावन:, शार्ङ्गधर प्रणीतो विवाहपटल:, नारायणकृतो मुहूर्तमार्तण्ड: रामभट्टोट्टंकितो मुहूर्तचिन्तामणि:, विठ्ठल दीक्षित निबद्धो मुहूर्तादियो ग्रन्था: सुप्रसिद्धा एव । शकुनशास्त्रमपि खलु संहिता-स्कन्ध भूतमेव । तत्र आम्रदेवात्मजेन जैन नृपतिना नृपतिजयचर्या नामको ग्रन्थो विरचित: ज्योतिषशास्त्रे फलादेशे सामुद्रिक-शास्त्रस्यापि महत्वपूर्ण स्थानं वर्तते । तत्र मेघराजकृतं हस्तसंजीवनमतीव प्रसिद्ध वर्तते । एवमन्ये पि एतद्विषयका: अनेके ग्रन्था: समुपलभ्यन्ते ।

## — गणित शास्त्रम् —

'ग्रहगणितं ज्यौतिषम्' ज्यौतिग्रहशास्त्रान्तर्गतमेव गणितशास्त्रं विभाव्यते। तत्र अंकगणितं त्रिकोणमिति ज्यामिति इत्यादयो ग्रन्थाः अंकगणितं, बीजगणित ग्रहविज्ञानस्यांगभूतं मन्यते। तत्र आर्यभट्टो, ब्रह्मगुप्तो, भास्कराचार्यश्चेति त्रयो विद्वांसो ग्रहतन्त्रस्य प्रसिद्धाः प्रणेतारः मूर्द्धन्यत्वेन गृह्यन्ते। दशमलव पद्धतिः शून्यगणना पद्धतिश्च गणितस्य तदंगभूतेव भारतीयानामेव विद्वदकृतिः। आर्यभट्टीय गणिताध्याययोः प्रथमौ द्वौ भागावतीव महत्वपूर्णौ आस्ताम्। ब्राह्मस्फुटसिद्धान्ते ब्रह्मगुप्ताचार्यस्य कुट्टकादयोऽपि निरतिशयं निरतिशयं गौरवालंकृतो प्रतिभाति। अंकगणित विषयको भास्कराचार्यस्य विश्वप्रसिद्धो सिद्धान्त शिरोमणि नामको ग्रन्थः तत्र लीलावत्याख्यो बीजगणिताख्यो, ग्रहगणिताख्यो प्रकरणत्रयमतीव प्राशस्त्यमुदवहति। ब्रह्मगुप्त-भास्कराचार्ययो ग्रन्थयोरंकगणित तन्त्र मिदमेतच्छास्त्र सम्पदा ज्यौतिषशास्त्रे तीव महत्वपूर्णं स्थानमावहति। भारतवर्षादेव शास्त्रमिदं सर्वत्र प्रसृतमिति तत्वविदोऽभिमन्यन्ते। गणित तन्त्रस्य चत्वारो अवयवा धन- ऋण, गुण-भागाकाराख्या विधयो, वर्ग- वर्गमूल, घन-घनमूलाख्यश्च पुनः विशेष विषयः ब्रह्मगुप्तभास्कराचार्ययो ग्रन्थेषु विशदरूपेण प्रतिपादिता दृश्यते। किंच ततो भिन्न पद्धति विषये, शून्यविषये, त्रैराशिकविषये च विधिविशेषः प्रदर्शितः। बीजगणितमप्युत्युन्नतां स्थितिमाविष्करोति उभावप्येतेवाचार्यौ सरल समीकरण सिद्धान्तमपि भूयसा वृवक्रन्तो। भारतीय बीजगणितस्य समृद्धैर्बहुभिः वैदेशिकैरपि प्रशंसा कृता। ज्यामितितन्त्रमपि सविशदमति चमत्कारपूर्णं पद्धत्या निरूपितम्। ज्यामिति शास्त्रमिदं यज्ञ प्रक्रियासु बहुतरं सहाय्यमाचरति। तद्वर्णनंच शुल्वसूत्रेषु सम्यगुपक्रान्तम्। यज्ञवेदि प्रकारश्च भूयसा ज्यामितिमालम्ब्यैव प्रवर्तते। अधुनातनं

पयथागोरस सिद्धान्तनाम्ना प्रसिद्धं तत्वमपि एषु ग्रन्थेषु प्राक्तनकालादेव निष्पन्नमभूत् । एतत्वतीव कौतुकावहं यदि त्रिकोणमिति तन्त्रमपि भारतीयानां परिचित वरमासीदिति । सो यं गणितशास्त्र प्रपंचो वेदांगभूतो वस्तुतो देवादेवलब्ध-प्रसव इत्यत्र तु न संदेहावसरः तथापि वेदेषु बीजरूपेण गणितशास्त्रस्यापि प्रतिपादनं यद् दृष्टि सरणिमवतरति तद् न कस्य मनस्याह्लादमुपजनयति । वस्तुतः यथा अस्माभिः प्रदर्शितं अन्यत्र गणित विज्ञानस्य मूलभूत एकादारभ्य परार्द्ध पर्यन्तं संख्या[7] परिसंख्यानोपदेशः ।

'इमा मे अग्न इष्टका धेनवः सन्तु -----,
एका च दश च, दश च, शतन्च
शतन्च सहस्रंच, सहस्रायुतंच
नियुतन्च, नियुतन्च प्रयुतंचार्बुदंच
समुद्रश्च मध्यंचान्तादश परार्द्धश्च [8]।।
(यजुर्वेद)

अथमथैव गणितशास्त्रस्य मूलभूतः सिद्धान्तः एवं धन, ऋण, गुण विभागादीनामपि परिज्ञानं वेदमन्त्रेषु सुस्पष्टमुपलभ्यते । सुधीभिस्तत्र तत्रैव यथाप्रकरणमनुसंधेयम् 'एकाचमे तिस्रश्चमेतिश्चमे पंच च मे पंच च मे सप्त च मे सप्त च मे, नव च मे नव चमे[6] ? इत्यादि यजुर्वेदीयाष्टदश शतमा ध्यायस्य चतुर्विंशति पंचविंशति मन्त्रयोः गणित सिद्धान्तोल्लेखे दृश्यते ।

यथा, एकस्मिन् एकयोगेन द्वौ भवतः (१+१ =२), द्वयोरेकयोगेन त्रयः सम्पद्यन्ते । (२+१ =३), एवमेव त्रिषु द्विसम्मेलनेन पंच जायन्ते । इत्थमेव रेखागणितस्यापि बीजं समुपलभ्यते —

इयं वेदि: परो अन्त: पृथिव्या अयं यज्ञो भुवनस्य नाभि: ।
अयं सोमो वृष्णो अश्वस्य रेतो[१०]

## ।। प्रतिशाख्यानि ।।

वैदिक साहित्यस्य व्याकरणमेव हि प्रतिशाख्यमुच्यते । वेद वेदांगानां संरक्षणार्थमेव प्रतिशाख्यानां प्रवृत्ति: । वेदानां प्रत्येकशाखामधिकृत्य प्रवृत्तत्वाद्धि शास्त्रमिदं प्रतिशाख्य पदेनाभिलप्यते, शाखां शाखां प्रतिशाखं, प्रतिशाखमधिकृत्य प्रवृत्तम्प्रतिशाख्यमिति तद् व्युत्पत्ति: । परमेतद् व्युत्पत्तिबलादनुमीयते । यावत्य: शाखास्तावन्ति प्रतिशाख्यानि अपेक्षन्ते । तत्र शाखा पुन: ११३० संख्यामिता: परन्तु एतावन्ति प्रातिशाख्यानि नोपलभ्यन्ते । प्राचीन ग्रन्थानुसारेण प्रतिशाख्यानां प्रतिपाद्य विषया: निम्नांकिता: प्रतीयन्ते - वर्ण समाम्नाय:, स्वर-व्यंजनानां गणना, तदुच्चारण विधयश्च, अज्झल विसर्गादि संधि प्रभृतय:, प्रगृह्यादि संज्ञा, पदविभाग नियमास्तदनुवाद नियमाश्च, उदात्तानुदात्त स्वरित भेदा आख्यात स्वरा:, तथा पदपाठवर्णोच्चारण नियमा: विविच्यन्ते । तैत्तरीय प्रतिशाख्ये पद-जटा-पाठादि भेदा: प्रदर्श्यन्ते । वस्तुतो विमृश्यमाने विगम्यते यत्प्रतिशाख्यं हि नाम वेदशब्दानां बाह्य परिवर्तन सन्धि-स्वर-ध्वनि प्रतिपादकं शास्त्रम्, तत्र ऋक्प्रतिशाख्यं 'पार्षदसूत्र' नाम्नापि प्रसिद्धं त्रिभिरध्यायैरूप निबद्धं त्रिरत्न भाष्य संवलितमिदं प्रतिशाख्यं खल्विदं ऋग्वेदस्य व्याकरणरूपमेव । यजु: शुक्ल प्रातिशाख्यंच अष्टाभिरध्याये-गुम्फितं खलु प्रसिद्धमस्ति । चतुर्भिरध्यायैरूप निबद्धं त्रिरत्नभाष्य संवलितं तैत्तिरीय प्राति-शाख्यम् । पुष्पर्षि प्रणीतमेकमन्यत पुष्पसूत्राख्यं साम प्रतिशाख्यं दश प्रपाठकै:एकादश-कण्डिकाभिश्च प्रणिबद्धमधुना मुद्रितमुपलभ्यते । यत्र विशिष्य सामगान विवरणमस्ति । ऋक प्रतिशाख्यमेव हि लब्धेषु षट् प्रतिशाख्येषु प्रधानतममस्ति ।

## ।। वेदे वर्णिता देवता ।।

वेदेष्विन्द्रदेवताकानां मन्त्राणां संख्या प्रायशः षट्सहस्रमिता । अग्नि देवताकानांच सार्द्ध त्रिसहस्रमिता इत्यनेन अनयो देवता द्वयो महत्त्वपूर्णं सूच्यते । ऋग्वेदे प्रथममण्डले प्रथमं सूक्तमग्निदेवकत्वात् आग्नेय सूक्तमुच्यते । तत्र परमेश्वरः, नेता, राजा, गुरुः, अग्निः, सूर्यः विद्युद् आत्मावेति भावः सो यमग्निः, वैश्वानरः, धनंजयः, जातवेदाः, तनूनपात्, रोहिताश्वः, हिरण्यरेताः, सप्तर्षि, सप्तजिह्वः इत्यादि । इन्द्रो हि नाम वैदिक साहित्यस्यातितरां वैशिष्ट्य सम्पन्ना देवता । अस्मिन् खलु देवता प्रपंच इन्द्र एव सर्वाधिक्तया देवत्वेन मन्त्रानधिक्रोति । महान्, मनस्वान्, विभुः, विश्ववेदाः, देवतमः पितृतमः, स्वरोचिः, अमर्त्यः, सप्तरश्मिः, धर्मकृत, वज्रबाहुः इत्यादीनि नामानि वर्णितानि दृश्यन्ते ।

अपरा विशिष्टा देवता सोमः, इन्द्राग्नि, देवताकान् मन्त्रान् विहाय सोमदेवताका यावन्तो मन्त्रा उपलभ्यन्ते न तावन्तः अन्यदेवताकाः । सोऽयं सोमो विविधरूपेण स्मर्यते । क्वचिद्गिरां पतिः इन्दुः, पीयूषं, पवमानः, राजा, प्रजापतिः, विष्णुः, वायुः, वर्णः, यशः, हविः, वीर्यम्, दुग्धं पुमान् वै सोमः सुवर्णमित्यादि पदैवरिति । वेदेवर्णितः सोमशब्दः क्वचित् सोमवल्लीमभिधत्ते क्वचिद० क्वचिदिन्दुं वीर्यञ्च । सोमलता विषये सोमपान विषये मतानि बहुतरं भिद्यन्ते । केचिल्लभ्तामपरे सुरां, सुरासवं, द्राक्षासवं, पौण्ड्रमासवं, आमलकीरसं, माध्वीकञ्च मन्यन्ते । पारसीका: सोमं हउमा इति वदन्ति । अन्ये सोमं आम्नाय सहितं सोमं ब्र ब्रह्मज्ञानं सोमं प्रस्थापयन्ति । आयुर्वेदावलोकनेन ज्ञायते सोम संज्ञिका ओषधिरप्यासीत् । यथा सोम पर्ययैः चन्द्र प्रतिपदा वर्द्धते, जायति द्वितीये तथैव

सोमलताऽपि । चन्द्रकलानुसारं सोमलता पि क्रमेणोपचयं याति ततो मक्षयं । सोमलता याश्च भूयसी प्रशंसा श्रूयते । यजुर्वेदे देवतानां निर्देशः कृतः । लक्ष्यते यथा —

अग्निर्देवता वातो देवता सूर्यो देवता
चन्द्रमा देवता वसवो देवता
रूद्रो देवता आदित्यो देवता
मरुतो देवता विश्वे देवा देवता
बृहस्पतिर्देवता इन्द्रो देवता
वरुणो देवता ।[११]

वेदे न केवलं देवतवादतत्वमेव विवेचितं वर्तते । अपितु कतिपयानि मनोहराण्याख्याना- न्यपि अंकितानि सन्ति । वैदिक व देवतास्वरूपमधिकृत्य बहुभिर्बहुविधो विचारः कृतः तथापि सर्वेषां तात्पर्यं विषयीभूतोऽर्थो सजात्यं नावगाहते । तत्र तु सर्वाप्यमी देवता गौणरूपा मुख्यत्वं देवत्वं तु भगवतः परमात्मन एव । निरुक्त दैवतकाण्डस्य सप्तमे ध्याये प्रोक्तम् -

"महाभाग्याद देवताया एक एक एव बहुता स्तूयते ।
एकस्यात्मनो न्ये देवाः प्रत्यंगानिभवन्ति ।।"

एवमेव- तस्या महाभाग्यादेकस्यापि बहूनि नामधेयानि भवन्ति । संवलिते पि राष्ट्रे एकनरवद् बुद्धित्वात् नरराष्ट्रमिति उच्यते, तद्वदनेक रूपैः प्रकाशिते पि देवता समुदाय एकरूपैव परमात्मा प्रकाशते " एकं सद्विप्रा बहुधा वदन्ति" इति विप्रा विद्वांस एकमपि सद् ब्रह्म बहुधा प्रस्तुन्वन्ति, तस्मात्सर्वैरपि परमेश्वर एव हूयते इति सायणः। यद्यपि अग्निः, वायुः, सविता, त्वष्टा, ऋभुः, अश्विनौ,

पर्जन्यः, उषा, विष्णुः, रुद्रः, इन्द्रः, वरुणः, मित्रावरुणौ, अदितिः, आदित्यः, बृहस्पतिः, ब्रह्मणस्पतिः, सोमः, आपः इत्याद्याः प्रसिद्धा देवता सन्ति। देवतानां वैविध्यं प्रति अथवा भेदं प्रति नित्यत्वं प्रति ऐच्छिकत्वमनैच्छिकत्वं प्रति न च को पि महीयान् विशेषः । यथा विभिन्नमार्गगामिनीनां सरितामेक एव प्राप्ति समुद्देशः सागररूपस्तथैवात्र देवतविषयेप्यवगन्तव्यम् । वैदिक साहित्ये वेदानामनेकाः शाखाः । प्रतिवेदं च ब्राह्मणानि, आरण्यकानि, उपनिषदः, श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि वेदतत्त्वार्थावबोधकानि ऋषिभिः प्रणीतानि वैदिकैर्महता दरेणावलोक्यन्ते।

॥ ब्राह्मणानि ॥

ब्रह्माणि जनयन्त विप्राः 'ब्रह्माणि सृजे वशिष्ठः इदं ब्रह्म क्रियमाणं नवीयः इत्यादि ऋग्वेदीय मन्त्रांशैः ज्ञायते, यत् मन्त्राणां मन्त्रात्मक सूक्तानां चैकं मौलिकं नाम ब्रह्म अपि अस्ति । अतः ब्रह्मपराभिधात्रैर्मन्त्रैः सम्बन्धत्वादेव ब्राह्मणानि उच्यन्ते । एतेषु यथावसरं मन्त्राणां व्याख्यानमुपलभ्यते । ब्राह्मण शब्दोयं किल ब्राह्मणशब्दात्प्रोक्तार्थे णि कृते निष्पद्यते । ब्राह्मणेन प्रोक्तं ब्राह्मणमिति यद्यपि मन्त्रार्थविबोधोपायिकतया सार्थकत्वं ब्राह्मणानामुपादितम् तथा पि भूयसा यागविधय एवैषां प्रधानो विषयः । अतएव 'कर्म चोदनानि ब्राह्मणानि' इति आपस्तम्बीय लक्षणमपि संगच्छते । एतेषु यथावसरं मन्त्राणां व्याख्यानमुपलभ्यते । मन्त्राणामुद्धरणं कृत्वा, तदाधारेण स्वप्रतिपाद्य प्रतिपादनम् स्व प्रतिपाद्यसमर्थनं वा अपि उपलभ्यते । विभिन्न यज्ञीय कर्मसु मन्त्राणां विनियोग ~~प्रकारश्च~~ प्रकारश्च

अपि प्रदर्शिता वर्तते । सदैव तत्र इतिहासादिकमप्यस्ति । किन्त्वेतेषां मूलस्वरूपं त्वेतादृशानां स्वतन्त्राणां प्रकरणानां रूपे एव संभाव्यते । एषां ग्रन्थानां मूलरूपे कर्मसम्बन्धीनि कलात्मकानि वा ब्राह्मणरूपाणि प्रकरणान्यैवासिता पश्चाद् यथा च यद् ब्राह्मणानीतिहासान पुराणानि कल्पान् गाथा नाराशंसीरिति[१२] इति तैत्तरीय आरण्यक वचनेन ज्ञायते, ब्राह्मणानां मूलैः कल्पात्मकैः प्रकरणैः सह इतिहास-पुराणादिकं संकल्प्य तत्सर्वं ब्राह्मणमन्थत् —

'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारण कल्पना ।।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु ।'[१३]

इति वचनानुसारेण ब्राह्मणानां हेत्वादिकाः दश प्रतिपाद्य विषयाः मन्यन्ते । समासतः ब्राह्मणं त्रिविधं मन्यते विधिरूपमर्थवादरूपं तदुभय विलक्षणरूपं च । तत्र विधिरेव मुख्यः वर्तते । आरण्यकान्युपनिषदश्च ब्राह्मणानामन्तः एव मन्यते तथ च गो बलीवर्दन्यायेन, ब्राह्मण परिव्राजक न्यायेन पृथगपि गव्यन्ते । कदाचित् ब्राह्मण वाङ्मयमपि तस्मिन् काले विपुलमासीत् । इदानीं कानिचित् एव ब्राह्मणान्युपलभ्यन्ते । ऋग्वेदस्यैतरेय ब्राह्मणं, कौषीतकि ब्राह्मणमिति ब्राह्मणद्वयमुपलभ्यते । कौषीतकि ब्राह्मणं शाखायन ब्राह्मणमप्युच्यते । शुक्ल यजुर्वेदस्य एकमेव शतपथ ब्राह्मणं तस्य शाखाद्वयानुसारेण काण्व शतपथ ब्राह्मणरूपे माध्यन्दिन शतपथ ब्राह्मणरूपे चोपलभ्यते । कृष्णयजुर्वेदस्य तैत्तरीय ब्राह्मणमप्युपलभ्यते । एतदतिरिक्तस्य विभिन्नासु संहितास्वपि ब्राह्मणभागः संमिश्रितः वर्तते । ब्राह्मण संमिश्रण हेतोवायं कृष्णः कथ्यते इति च मन्यन्ते । सामवेदस्य न व ब्राह्मणान्युपलभ्यन्ते ताण्डव ब्राह्मणम्, षडविंश ब्राह्मणं, सामविधान ब्राह्मणं, आर्षेय ब्राह्मणं, दैवत ब्राह्मणम्, उपनिषद

ब्राह्मणं, संहितोपनिषद् ब्राह्मणम्, वंश ब्राह्मणम्, जैमिनीय ब्राह्मणम् इति । एतेषु ताण्ड्य ब्राह्मणं, पंचविंश ब्राह्मणमप्युच्यते । षड्विंश ब्राह्मणस्यान्तिम प्रपाठकरूपे अद्भुत ब्राह्मणमस्ति । सम्पूर्ण उपनिषद ब्राह्मणमस्य प्रारम्भिक प्रपाठकद्वयं वा मन्त्र ब्राह्मणमप्युच्यते । जैमिनीय ब्राह्मणस्यैको शः जैमिनियोपनिषद ब्राह्मणं तलवकार ब्राह्मणं वापि उच्यते । अथर्ववेदस्य एकमेव गोपथ ब्राह्मणमुपलभ्यते । सामवेदस्य ब्राह्मणसम्पत्तिः सर्वाधिका वर्तते । ब्राह्मणेषु शतपथ ब्राह्मणं प्रमुखतां भजते । तदेवं ब्राह्मणानि वेद गूढार्थमेव बोधयितुं यज्ञ यागादि कर्मकाण्डजातं परिमण्डयितुं च श्रुति तत्वार्थांश्च व्याख्यानादिभिरमधिगत ज्ञान विशेषाणां जन सामान्यानां बुद्धि दर्पणे संक्रमयितुं प्रवृत्तानीति निर्दिष्टं मया । एतेषु किल ब्राह्मण ग्रन्थेषु समुपवर्णितान्याख्यानान्यतीव रुचिराणि मनोहराणि च उपदेश पराणि, उपादेयानि हृदयवर्जकानि च । तद् यथा ऐतरेय ब्राह्मणस्य सप्तम् पंचिकायास्तृतीये ध्याये - शुनः शेपाख्यानम् तीव रमणीयं सम्पन्नम् । एवं शतपथ ब्राह्मणे पि भूयास्याख्यानानि श्रूयन्ते । तेषु प्रलय विषयकमाख्यानमतीव रुचिकरम् । एवं ब्राह्मणं साहित्यमतीव विस्तृतम् । केचन ब्राह्मणानामपि वेदत्वमंगी कुर्वन्ति । परन्तु अपरे तत्र विप्रतिपद्यन्ते । ब्रह्मवेदस्तस्य व्याख्यानानि ब्राह्मणानि, ब्राह्मणैः प्रोक्तानि वा ब्राह्मणानीतित्युपगच्छतां तु ब्राह्मणानां वेदत्वं न संभवति । किंच सायणेन प्रतिपादितं "मन्त्र ब्राह्मणात्मकः शब्दराशिर्वेदः कथमभिलपितमिति । किंच मुनिवरेण पाणिना पि सुस्पष्टमेव ब्राह्मणानां वेदत्वं ध्वनितम् - "द्वितीया ब्राह्मणे" "चतुर्थ्यर्थे बहुलं छंदांसि[१४] इति सूत्रद्वयं निबध्नता। पाणिनीये हि छन्दः शब्दो यं वेदवचनः ।

## ।। आरण्यकानि ।।

प्रमुखत आरण्यकेषु यज्ञ यागादिकानामाध्यात्मिक तथ्यानां मीमांसा - ध्यात्मिकी व्याख्या वोपलभ्यते । आध्यात्मिक-रूपेण प्राणस्य चर्चाप्यत्र प्रामुख्यं भजते । स्वरूप आध्यात्मिकत्वादेतान्यरण्ये पठनीयत्वेन स्वीकृतानि संभाव्यन्ते, अरण्य पठनीयत्वेन पठनीयत्वात् चैतान्यारण्यकान्यभिहितानीत्यपि संभाव्यन्ते । परिशिष्ट भागरूपाणि ब्राह्मणभागस्यारण्यकानि । आरण्यकानां वाणप्रस्थानामध्ययनाध्यापन स्वाध्यायपराणि यज्ञ-यागादि विधि विधायकानि शास्त्राणि । अरण्ये ध्ययनादेवै-मान्यारण्यकानीति व्याख्यायन्ते । "अरण्य एव पाठयत्वादारण्यकमितीर्यते " इत्युक्तेः। आरण्यकानां दिशा निखिलं विश्वमेतद यज्ञमयम । केवलं देवतामुद्दिश्य द्रव्यत्यागमेव यज्ञत्वेनारण्यकानि नाभिनन्दन्ति । एषां नयेन यज्ञादि कर्मकाण्डोपनत स्वर्गादि फलस्य क्वचिद् नायिष्णुतया न तदात्यन्तिक सुखस्य जनकम् । न च काश्चिद् ज्ञानमार्गेणैवात्यन्तिक सुखमवाप्तुमर्हति नापि केवलं कर्ममार्गेण । तेषां नयेन ज्ञानकर्म समुच्चय एव आत्यन्तिक सुखं समुच्चिनोति । सो यं ज्ञान कर्म समुच्चय सिद्धान्त आरण्यकेष्वेव प्राक् अंकुरितः पश्चाद् वेदान्तेषु पुष्पितः फल फलितश्चावगम्यते । अधुना तु केवल त्रीण्येवारण्यकान्युपलभ्यन्ते । ऐतरेयारण्यकम्, शांखायनारण्यकम्, तैत्तरीयारण्यकम् च । एतेषु प्रथमे आरण्यके ऋग्वेदीयेस्तः, अन्तिमं च कृष्ण यजुर्वेदीयमस्ति। बृहदाराण्यकं यदेकोपनिषद मन्यते, एकमारण्यकमेवास्ति, यथा चास्य नाम्नैव ज्ञायते, इदं शुक्लयजुर्वेदीयमस्ति । बृहदारण्यकं यदेकोपनिषद मन्यते , एकमारण्यकमेवास्ति । यथा चास्य नाम्नैव ज्ञायते । इदं शुक्ल यजुर्वेदीयमस्ति । अनेनैव प्रकारेणान्यानि च कतिपयान्यारण्यकान्युपनिषत्सु परिगणितानि जातानि, कतिपयानि च ब्राह्मण संकलितानि ब्राह्मणेभ्यः पृथक् कृतानि न जातानि । ब्राह्मणग्रन्थ समुद्वद् आरण्यकानामपि

बह्वो ग्रंथा: परन्तु तेषु सर्वातिशायितया प्रसिद्धं ऋग्वेदीयं 'ऐतरेयारण्यकम्'
ऐतरेयारण्यकमेतद् पंच विभागैर्निबद्धं वर्तते । तत्र प्रथमे भागे पंचाध्याया, द्वितीये
भागे सप्त अध्यायाः, तृतीये भागे द्वौ अध्यायौ, चतुर्थे च एक:, पंचमे त्रय: सर्वे
सम्भूय अष्टादशाध्याया: । अध्यायाश्च पुन: खण्डैरनुस्यूता: । एतेषां त्रयाणामारण्यकानां
प्रचारक: इतरापुत्र: ऐतरेयो महीदास:, चतुर्थस्य चाश्वलायन: पंचमस्य शौनकाचार्यश्च ।
ऋग्वेदस्यापरमारण्यकं शाखायनं नाम । यत्कौषीतकी नाम्ना प्याख्यायते ।
आरण्यकमेतद् पंचदशाध्याये निबद्धं सप्तत्रिंशदुत्तरशतखण्डात्मकम् । अस्मिन्नारण्यके
शुन: शेप-अहल्या-खाण्डव-कुरुक्षेत्र- मत्स्य-उशीर-काशी- पंचाल-विदेहादीनाम -
प्युल्लेखो दृश्यते । कृष्ण यजुर्वेदीय तैत्तरीयशाखायास्तैत्तरीयकम् दश प्रपाठकैर्निबद्धं
शतोत्तर सप्ततिमितैरनुवाकैरनुस्यूतम् । अस्यानुवाक संख्यासु भूयान् मतभेद: । दशमे
प्रपाठके द्रविडभाषा ग्रथिते चतु: षष्ठि:, आन्ध्रपाठे शीति:, कर्णाटक पाठे
चतु: सप्तति:, अन्येषु कतिपयेषु एकोन नवति: अनुवाका: सन्ति इति सायणाचार्य
महाभागेनान्ध्रपाठमेव स्वीकृत्य तस्यैव व्याख्या कृता वर्तते । सामवेदस्य जैमिनिय
शाखाया जैमिनीयोपनिषद् ब्राह्मणमेव 'तवलकारण्यक' नाम्ना प्रसिद्धम् । अस्मिन
ब्राह्मणे ब्राह्मणारण्यकोपनिषदिति त्रयो प्यनुस्यूता: सन्ति । अस्मिन् साममन्त्राणां
व्याख्यात्यन्तशोभना कृताऽवलोक्यते । अथर्ववेदस्य नाद्यावधि एक मप्यारण्यकमुपलब्धम् ।
वेदार्थबोधे ब्राह्मणानिवदारण्यकान्यप्यतीव सहायभूतानीत्यत्र नास्ति संदेहावसर: ।
अतएव आरण्यकानि रहस्य ग्रन्था इति नाम्ना पिस्मर्यते । शुक्ल यजुर्वेदस्योभयो:
शाखयोर्माध्यन्दिनी काण्वभिधयोरारण्यकमपि माध्यन्दिनारण्यकं, काण्वबृहदारण्यकमि-
त्यारण्यक द्वयं प्रसिद्धम् । अथ भारतीय संस्कृति परम्परा प्रसर आरण्यकान्यतीव
महनीयं पदमलंकुर्वन्ति ।

## ।। उपनिषदः ।।

उप-नि- पूर्वकस्य विशरणगत्यवसादनार्थकस्य षद् ॡ धातोः क्विबन्तस्य रूपमिदमुपनिषत् ।उप-उपगम्य गुरुमाचार्यमुपलभ्य वा ब्रह्मोपदेशं तन्निष्ठतया परिशीलयता दृष्टानुश्रविक विषय वितृष्णानां मुमुक्षूणामविद्यादेः संसार बीजस्य नितरां निश्शेषेण वा सद- अवसादयित्री विशरणकर्त्री तद् द्वारा ब्रह्मोपगमयित्री या सोपनिषदिति । पुराकाले वेदेषु या ध्यात्मिकी विचारधारा सीत्, तस्याः चरमः विकास उपनिषत्सु एव जातः, अतः अस्मिन् रूपे आज्ञां वेदानामन्तत्वाद् अर्थात् सारभूत सिद्धान्तत्वात् सारभूत सिद्धान्तानां प्रतिपादकत्वात् वेमोः `वेदान्त` नाम्ना अपि प्रसिद्धाः सन्ति । वैदिक वाङ्मयस्य विकासधारायामन्तिमत्वादप्येताः `वेदान्त` नाम्ना कथ्यन्ते । एतासु आध्यात्मिक विचाराणां प्राधान्यमस्ति । एता जगन्मूलतत्वस्य ब्रह्मणः स्वरूपं प्रकाशयन्ति । तस्मात् जगत्सृष्टि प्रक्रियां वर्णयन्ति, तस्य जगदन्तरात्मत्वम् प्रतिपादयन्ति, तेन सहजीवात्मनां जागतिकानाम् च पदार्थानाम् सम्बंधं सूचयन्ति । जीवानाम् बन्धमोक्ष स्वरूपं प्रतिपाद्य मोक्ष साधनानि वर्णयन्ति । एतादृशा एवान्ये पि तत्वमीमांसा सम्बन्धिन आचार मीमांसा सम्बन्धिनश्चानेक विषया उपनिषत्सु वर्तन्ते । प्राय उपनिषदे ब्राह्मणारण्यकेषु संकलिताः वर्तन्ते । उपनिषत्सु मुख्यवृत्या ब्रह्मविषेक साधनस्य त्रिविध दुःख विप्रमोक्षस्य मोक्षस्यैवोपदेश इति उपनिषदामेव परा विद्येति पदेन व्यपदिश्यते । एतावतोपनिषदां वैशिष्ट्येन ब्रह्मविद्यात्वं संज्ञाप्यते, न जातुवेदानां तद्वत्वं तावता परिबाध्यत इत्यवधेयम् । उपनिषदः केचन केवल मद्वैत प्रतिपादिका इति स्थापयन्ति । एके विशिष्टाद्वैत विधायिका इति प्रतिपादयन्ति । अपरे शुद्धाद्वैत परा इति समीक्षन्ते । अन्ये शुद्धा-द्वैतोपदेशिका इति मन्यन्ते । परं वैदिकास्तु त्रैतवादसाधिका एव ता इति सिद्धान्तयन्ति ।

तर्कयन्ति च संजाघटीतितासां त्रैदवादपरत्वं वेदमूलकत्वात् । वेलमूलकत्वे त्वासां न के पि वादिन: प्रतिदिनो वा संशेरते । सन्ति खलुपनिषदो वेदमूला इति सर्वेषामेव निर्विवादमभिमतम् । वेदाश्च त्रैतवाद् परा एव । परं द्वैतवादि नस्तु नैतन्मतमभिनन्दंति, उदाहरन्ति च स्व स्व मत प्रतिष्ठापनार्थं मुवांसि औपनिषद् वचांसि 'सर्वं खल्विदं ब्रह्म' नेह नानास्ति किंचन इत्यादीनि तेषां वाचोक्तिरपि बलीयसी अस्ति । उभयविधान्येव वचनानि समुपलभ्यन्ते, उभय विधानि च तानि संगच्छन्ते । भिन्न रुचिर्हि लोकोभिन्नमतिश्च । यथैकस्य स्वदते नान्यस्य । यथैकस्मै रोचते न तदन्यस्मै ।

अथोपनिषत्साहित्यं संस्कृत वाङ्मयेऽतीव गौरवास्पदम् ब्रह्मविद्या अध्यात्मविद्या पराविद्या चेति नाम्नेमा: कीर्त्यन्ते । उपनिषद: खलु वेदान्त संज्ञया पि प्रसिद्धा: । सेयं संज्ञा तासां वेदस्यान्तं वेदान्तमित्यर्थमव ष्टभ्येति प्रतीयते । उपनिषत्सु तु द्वैताद्वैतावुभावपि पक्षौ प्रतिपादितौ दृश्येते । उपनिषत्सु श्री शंकराचार्यो द्वैतमपि पल्लवितमाकलयति । रामानुजाचार्यो विशिष्टाद्वैतवादम, निम्बकाचार्यो द्वैताद्वैतवादं, वल्लभाचार्यो विशिष्टाद्वैतवादं मध्वाचार्यश्च पुनर्द्वैतवादमेवेति । तदेवमैकान्ततो विलक्षणमेव प्रतिभाति । एता: सर्वा अपि उपनिषद: नैव लौकिक पदार्थानां तत्वार्थं मुख्यतया विचारयन्ति । प्राधान्येनव्याख्यान रूपेण वाद प्रतिवाद रूपेण वा लौकिकमात्मतत्वमेव ता: समर्पयन्ति । तत्र प्रकीर्णतया व्यवस्थमुपवर्णिता विषया एव पश्चात्काले वेदान्त सन्दर्भेषु यथायथं सोपपत्ति पुरस्सरं व्यवस्थापिता वर्तते ।

उपनिषदांकाल अवभित्थन्तया निर्धारयितुमशक्यमेव । तथापि एक एता विभिन्नकाल विरचिता एव वक्तुं शक्यते । तत्र प्रथम काल संभवा:क्रमेण ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्याभिधाना: । ततो बृहदारण्यक छांदोग्योपनिषद् तैत्तरीय-ऐतरेयादीनां गद्य-पद्य रूपेण उदयमभूत् । ब्राह्मण ग्रंथस्य भाषा सरणिमवलम्ब्य

निबद्धास्ता: सारत्येन सौन्दर्येण च सचेतसां चेतांसि दृढादावर्जयन्त्यो विलसन्ति । उपनिषदि आख्यान रूपेण बहवो दिव्या उपदेशा: समुपलभ्यन्ते ये दे पि दि मात्रमत्र प्रणिभालनीया: तथा कठोपनिषदि प्रेत्यभावविषयक तत्वमाख्यान रूपेण प्रतिपादितम्। यच्च नाचिकेतमुपाख्यान नाम्ना प्रसिद्धम् । उपनिषदे संवादरूपेणातीव मनोहरा उपदेशा: समुल्लसन्ति । तात्विक दृष्ट्या विचार्यमाणेत्थिथं ज्ञातं भवति । यदुपनिषद् ग्रन्था: अध्यात्मविधा प्रधाना: । तासु संवादरूपेण आख्यान रूपेण च विविधा-विधा: समुपदिष्टा : । सर्वेषां संवादानां तात्पर्यं विषयी भूतो थें: आत्मानमधिकृत्य प्रस्तुत: । छन्दोग्योपनिषद बृहदारण्यकोपनिषच्चेत्युपनिषद् द्वयमतीव बृहदाकारकम् । तत्र छान्दोग्यं हि सामवेदस्य तावलकारशाखाया उपनिषद अष्टाध्याय प्रणिबद्धा । उपनिषत्सु मते मनुष्या एव उत्तम गुणै: सम्पन्ना देवा: त एव हिंसादि परा असुरा: लोभ प्रधाना मनुष्या: । उपनिषत्सु टीका: प्राय: सर्वेषामाचार्याणां दृश्यन्ते । उपनिषत् साहित्यमेव सर्वेषां सम्प्रदायानां मूलभित्ति-रित्यत्र न का पि अत्युक्तिर्विभाव्यते । उपनिषत् साहित्यमातीव ज्ञान प्रकाशकं, शान्तिप्रदं, मानवसंस्कृतेरादि जननि चेति बहुभि: पाश्चात्य विद्वद्भिरुद्घोषितम । दिल्ली नृपते: शाहजहांवस्य आत्मज: दाराशिकोहनामा यवनोऽपि उपनिषद् साहित्ये तीव मुग्ध आसीत् । कासांचनोपनिषदमनुवादोऽपि पारसीक भाषायां सम्पादित: । विश्व तत्वज्ञानस्यादिमं स्रोत उपनिषदि महासरित् प्रवाहितं प्रतीयते । सत्यमेतत् —

'उत्तिष्ठ जाग्रत प्राप्य वरान् निबोधतेति उपनिषदां सनातन सत्येन प्ररणाप्रदं वचनामृतमतीव हृदयावर्जकम् । उपनिषत्सु उक्तस्य परमलक्ष्य साधनमेकमात्रं स्वस्वरूपज्ञान पूर्वकं ब्रह्मज्ञानमस्ति । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ।[१५] निचाय्य तन्मृत्यु मुखात्प्रमुच्यते ।[१६] तत्परमं ब्रह्मवेद ब्रह्मैव भवति । गुहा

ग्रन्थिभ्यो विमुक्तो मृतो भवति ।[१७] ब्रह्मविदाप्नोति परम् ।[१८] इदं ब्रह्मज्ञानम् च 'अहं ब्रह्मास्मि' तत्त्वमसि इत्यादि रूपे स्वात्मना स्वान्तर्यामिणा वा पर ब्रह्मणा सह स्वस्य एतादृशं साक्षादाध्यात्मिक तादात्म्यानुसंधानमस्ति । यास्मिन स्वरूप स्वरूपं निर्मलमस्ति सैव स्पष्टत: ब्रह्मात्मकमनुभूयते । एतादृशस्य ब्रह्मज्ञानस्य साधनानि श्रवण- मनन निदिध्यासना दीनि सन्ति । कर्माणि च तत्र सहकारितां भजन्ते । औपनिषदिकं दर्शनं कर्तव्यानाम् कर्मणां परित्यागं न प्रतिपादयति । अपि तु कुर्वन्नेवेहकर्माणि जिजीविषेच्छतं समा ।[१९] इत्यादि रूपे तेषामवश्य कर्तव्यतां बोधयति । एवं प्रमुखैरन्यैश्चानेकैः सिद्धान्तैर्युक्तं 'औपनिषदं दर्शनम्' विश्वस्य दार्शनिक क्षेत्रे उत्कृष्टतया विराजते ।

## वेदे वर्णितं सूत्रशास्त्रं
## तथा च
## ज्योतिर्विज्ञानम् ।

वेदानां सम्यक्तया ध्ययनेनैतत् स्पष्टं भवति यद् वेदानां रचनात: पूर्वमपि ज्योतिषशास्त्रमासीत् । वैदिक साहित्ये ज्योतिषविज्ञानं यावत् समुन्नतं सुसम्पन्नं च दृश्यते तावद् नान्यासु रचनानासु दृश्यते । यतोऽस्माकं भारतीयानां प्राचीनतम ज्ञान विषय: वेद एव विद्यन्ते । वेदवाङ्गमये प्रतिपादित ज्योतिषशास्त्रं विहाय तात्कालिक ज्योतिषशास्त्रस्यापि यौगित्वं निर्णेतुमशक्यमेव । वेदेषु य एव विषया : कर्मकालज्ञान आवश्यकी भूतास्तएव प्रतिपाद्यन्ते । तदानीन्तने काले गणित पद्धतिर्वा, पंचांग रचना पद्धतिर्वा, यन्त्रोपकरणादिकं वेत्यादि विषया अस्माकं तिरोहिता एव ।

मानव जाति परिणामफलत्वादरता: पाश्चात्य पण्डिता: केचित् ऋग्वेदमन्त्रकर्तॄन् सामान्य पुरुषामेव प्रकल्प्य तदानीन्तनकाले ज्योतिर्विज्ञानं सूर्यचन्द्रमसोर्गति विशादानीत - तिथि| नक्षत्र| ज्ञानमात्र पर्यवसन्नत्वान्नाति परिणतमिति ब्रुवन्ति ।तर्क्यमाणो विषये वेदे प्रतिपादित ज्योतिषशास्त्रमधिकृत्य तात्कालिक ज्योतिर्ज्ञानं स्थायी निर्णेतुं नोचितम् । वेदे ध्रुव तारानक्षत्रस्य स्थिरत्वं प्रतिपादितम् ।

"ध्रुवक्षिति: ध्रुवयोनिर्ध्रुवमसि ध्रुवत: स्थितम् त्वं नक्षत्राणां मेथ्यसि समापहि पृतन्यत:"

अमुमेव मन्त्रं मतासि कृत्वा यंभट्टेनोक्तम् "मेथीभूता स्वमध्यस्था " इति मेथिनाम पशुबन्धनोपयोगि काष्ठम् । यथा पशु: मेथिना बद्ध: सन् तत्परितस्तुल्यदूरे भ्रमति । तथैव ध्रुवं तत्परितस्तुल्य दूरे सर्वाण्य|पि नक्षत्राणि भ्रमन्ति, ध्रुवतारानक्षत्रं तु ध्रुवमेव तिष्ठति ।यस्यां मेथ्ये विषूवान् संपद्यते, विषुवं नाम समरात्रन्दिवकाल: । यदा सूर्य: क्रान्ति विषुवद् वृत्त संपात बिन्दु प्रविशति तदा सर्वेष्वपि देशेष्वहोरात्रे समाने भवत: । अनेन विषुवद्दिन ज्ञानेन विषुवद् बिन्दुज्ञानं भवतु । किन्तु विषुवद बिन्दोश्चलनं नोक्ताम् । खगोले द्विसप्तति वर्षाणु एवमेवांशं गच्छतोर्विषुवत् बिन्दोश्चलनं, यदि तत्र ज्ञातं भवति, तर्हि तेषां ज्योतिर्विज्ञानं महत् स्थायित्वमधिजगामेति वक्तुं शक्यते विषुवद् बिन्दुचलनं यद्यपि जालाचार्यादिभि: प्रतिपादितम्, किन्तु वैदिक वाङ्मये प्रोक्तं न वा वेति विमर्शनायां नोक्तमेवेति वक्तव्यम् । उक्तस्वरो पि तत्र नास्ति । अत्र प्रकरणे लोकमान्यैस्तिलक महाशयै: किंचिदुक्तं कृष्णयजुर्वेदसंहितायां -

"फाल्गुनी पूर्णमासे दीक्षेरन्, मुखं वा एतत्संवत्सरस्ये" तुइक्ता पुन: "चित्रापूर्णमासे दीक्षेरन् मुखं वै तत्संवत्सरास्ये" त्युक्ते संवत्सरारम्भकं यद् विषुवत् दिनं तद् कदाचिद् चित्रापौर्णमास्यां कदाचित् फाल्गुनी पौर्णमास्यामपि

वभूवेति युक्त्या विषुवद बिन्दोः पश्चात् चलनवशेन ऋतु प्रारम्भकालः पश्चान्नीयत इति वैदकालिका आर्या बुबुधिरित्युक्तम् । प्रकरणवशेन अत्र किंचिदुच्यते । अमुमेव विषुवद् बिन्दु चलनं पुरस्कृत्य --

"एता दवै कृत्तिकाः प्राच्यै दिशो न च्यवन्ते ।" इत्यादि वैदवाक्य परिशीलने कृत्तिकानां प्राचीदिगुदयन सिध्यर्थं सैद्धान्तिकोपपत्त्या तासां विषुवद् बिन्दुस्थितिः सिद्ध्यति । अनेन यस्मिन् काले विषुवद् बिन्दुः कृत्तिकासुतिष्ठतीति विलोमगणनायां वैदकालः षट्सहस्रवर्षेभ्यः प्राक् आसीदिति निर्णीतम् । इत्यस्मिन् विषये श्री लोकमान्य तिलक महाशयैः -

"वैद कालेषु विषुवत् बिन्दु मृगशीर्षं आसीदिति निर्णेतुं शक्यते । अतो वैदकालो षट सहस्र वर्षेभ्यः प्रागासीत्" इति निश्चीयते । अन्यच्च सौर-चान्द्रमानयोरनन्तरं वैदकाल एव ज्ञातमिति तिलक महाशयैः प्रतिपादितम् तद् यथा कालमानानां सिद्धान्त प्रसिद्धानां नव संख्यानां मध्ये सर्वेष्वपि देशेषु प्रायशः स्वीक्रियमाणे सौरममानंचन्द्रमानं चैति द्वे माने । सौरममानं च निरयन सौरमानं सायन सौरमानं चैति द्विविधम् । सूर्यो श्विनीमारभ्य पुनरश्विनी पर्यन्तं यावता कालेन गच्छन्ति, तावान् निरयन संवत्सरः । स एव सूर्यो विषुवद् बिन्दुमारभ्य पुनर्विषुवद बिन्दु पर्यन्तं यावता कालेन गच्छति तावान् सायन सौर संवत्सरः । विषुवद बिन्दोः स्वल्पगतिकत्वाद् इमौ वत्सरौ किंचिद् भिन्नौ । चान्द्र संवत्सरो नाम द्वादशभिश्चन्द्र-मासैः पूर्णश्चान्द्रमास इत्युक्ते अमावस्यामारभ्य पुनरमावास्या पर्यन्तं मध्यवर्ती कालः । दर्शपूर्णमासयोर्वैद ऋतुषु मुख्यतया गृह्यमाणत्वाद् चान्द्र एव वैदोदिदष्टो वत्सरः । सौरचान्द्रवर्षयोरनन्तरं किंचिद न्यूनं द्वादश दिनात्मकम् । इमन्तरं यदा

चान्द्रमास तुल्यं भवति तदा अधिकमास इति व्यवस्थया तं शुभकर्म बाह्यं कृत्वा पंचांगेषु तथा प्रतिपादयन्ति यथा सौर चान्द्रानन्तरं मासपूर्णं सत् कर्म बाह्यं कृतं तथैव प्रतिसंवत्सरमै तदनन्तरं द्वादशदिनात्मकं श्रौत कर्म बाह्यं कृतिमित्यधिकमास इति मैषु दिनेषु वैदक्रतुनामकार्यत्वात् क्रतूपयोगि वस्तु संचयः कर्तव्यो यदि काचिद् व्यवस्था विद्यते । वैदवाङ्मयं तत्रापि वेदा शिरांसीति प्रतिपादिता या उपनिषद-स्तस्य तासां च ये दृष्टारो महर्षयस्तेषां किंचिन्मात्र श्रद्धया शे ज्ञेय सौरचन्द्रमास-योरनन्तरं यस्य कस्यापि सामान्य पुरुषस्यापि ज्ञान विषयं तेषां ज्ञातं न वेति मीमांसित्वा तेषां ज्ञातं वेति स्यादिति सिद्धान्तीकरणे महर्षीणां गौरव हानिर्वेत्यस्माकमभिप्रायः । अत्र प्रकरणे वेदकाले ग्रहा एव न ज्ञाता इत्युक्तवन्तं किंचिद् विमर्शकं समाधास्यन्तस्तिलकमहाशया ग्रहा ज्ञाता एवेति स्पष्टीकृतवान् । सो प्यनवसर प्रयास एव कुत चैत खगोले देदीप्यमानानां ग्रहाणामवलोकनं ग्राम्यैरपि पुरुषैः क्रियते । तेन तेषां गतिश्चावगम्यते । तत्र तेषामभिज्ञानं वेदकाले नासीदिति उक्तिरपि हास्यास्पदमेव । कथं तर्हि ग्रहाणां पुनः पुनः स्पष्टतयोदाहरणं वेदेषु न कृतमित्याशंकायां प्रारम्भ एव समाधानमस्माभि रुक्तम् । किमित्यलौकिक पारमार्थिक विषयेषु उक्ते प्रवृत्तानां वेदवाङ्मयानां तादृशैलौकिकविषयैः प्रसंग एव न स्यात् । वेदवाङ्मय प्रतिपादित ज्योतिर्विषयाणां कृते परामर्शे तदर्वाचीनग्रंथानां तत्रादावस्माकं श्रुतिपथमवतरति काश्चित संप्रादयः । अष्टादश महर्षय एते प्राचीने भारते वर्षे वेदवद्रूपं सिद्धान्त -संहिता-होरेति स्कन्धत्रयात्मकं ज्योतिषशास्त्रं प्रावर्तयन्तिति । आचार्याणां नामग्रहणे अत्र पराशर संहितायां नारदसंहितायां यद्यपि पाठभेदो वर्तते तथापि तेषामाचार्याणां समयादि निरूपणं तद् रचित् सिद्धान्तानाम-लाभे तीव दृढकरम्, अतस्तेषां महर्षीणां विषये निरालम्ब चर्चां विहायोपलब्ध ग्रन्थानामेव कर्तॄन् पुरुषानाधिकृत्य यत्किंचित परामृशामः । तत्रादौ वेदांग

ज्योतिषमिति कश्चिद् ग्रन्थो वर्तते । महात्मना लगध प्रणीतामिति । यद्यपि याजुषमार्यं चेति वेदांग ज्योतिषं द्विविधं प्रसिद्धं वैदिक लोके । बहूनां पंडितानां वेदमद्यापि कंठे वर्तते । तत्र आर्यं ज्योतिषमेव लगध नाम उदाहृतं न याजुषं । तथापि ग्रन्थद्वये पि प्रतिपादितानां विषयाणां किंश्चिदेव भिन्नत्वादुभयमपि लगध सम्बन्धीति वक्तुं शक्यते । तत्रोपनिबद्धानां अंशानां मध्ये मुख्या इमे । पंच संवत्सरात्मकं युगमित्युभिहितम् एकस्मिन् संवत्सरे षाष्ठ्यधिक त्रिशतीमितानि सौरदिनानि वर्तन्ते । पंचवर्षात्मक युगारम्भो यदा धनिष्ठा नक्षत्र सहितौ सोमार्कौ स्वराक्रमेते सूर्यचन्द्रमसौ श्रविष्ठादौ उदीचीं प्रपद्येते । सार्पार्द्धे च दक्षिणामुदग्दक्षिणायने माघ श्रावण्योर्भवत: । षष्ठि सौरमासा: द्विषष्ठि-श्चान्द्रा क्षयाधास्त्रिंशत् । एकस्मिन् वत्सरे यदि षाष्ठ्यधिक त्रिशतीमितान्येव दिनानि चेद् इयं व्यवस्था साम्प्रतमुपलब्धस्य वर्षस्य सपादपंचदिनाधिकस्य विरुद्धमिव दृश्यते इत्याशंकायां पश्य गोलोक नाम्ना आंगुल पण्डितेन इत: पूर्वमेव रचितं ग्रन्थम् "सघटन्तो गोला:" इति ख्रिस्ताद् पंचाशदधिक सप्तदश शत वर्षेभ्य: पूर्वं कुजमण्डलं भूगोलस्यात्यन्त समीपे गच्छत, पृथिव्यां तीव्र कल्लोलं प्रलयसंकाशमकरोदिति, तत: परं सूर्यं परितो भ्रमतो भूगोलस्य कक्षैव विपरिणतेति वर्ष प्रमाणं पूर्वं षाष्ठ्यधिकत्रिशतीमित दिन तुल्यमेवेति, परं पंचभिरधिकी कृतमिति इदं विचार्यं पूर्वं ग्रन्थेषु प्रतिपादितान् विषयान् स्थूलतया मन्वाना विमर्शकास्तत्तादृशा विषया-स्तत्कालोप लब्धा भवेयुरिति ।

वैदिकल्पशब्द : ।

सम्प्रति पुराणेषु ज्योतिषशास्त्रे च ब्रह्मणो दिनबोधक: कल्पशब्दो यादृशमर्थं व्यनक्ति न तथा स वैदिक साहित्य उपलभ्यते । तैत्तिरीयारण्यक २०

कल्पशब्दस्य प्रयोगः कल्पसूत्रस्यार्थे विद्यते । पुराणे[२१] सहस्रयुगानां वैधसो दिनं कल्पशब्देनोच्यते । ब्राह्मण आयुषोमानं तन्मानेमेव शतवर्षात्मकं स्वीक्रियते यन्महाकल्पशब्देनाभिधीयते । पश्चात् पूर्वं वैदिक साहित्ये कालस्यमहत्वं मानं युगं ~~सं~~ संश्रूयते । कस्यापि कालमानस्य वाचकत्वेन युग रूप प्रयोगो वेदे बहुलतया दृश्यते । कृतादीनां चतुर्णां युगानां चर्चापि वेदे वहुत्र संदृश्यते । अधस्तनेषु मन्त्रेषु युगस्य विविधाः प्रयोगा दृश्यन्ते, तद्वचुषे मानुषेमा युगानि कीर्त्येन्यं मघा नाम विश्रत[२२] देवानां पूर्वे युगे सतः तदजायत ।[२३] सायणाचार्यमते युगशब्दस्यार्थः कृतादि चतुर्युगमेव स्वीक्रियते ।

या औषधीः पूर्वाजातादेवेभ्यस्त्रियुगं पुरा[२४] । अत्रोपस्थापित 'त्रियुगमिति' पदस्य कृतादि युगत्रयमथवा वसन्तवर्षाशरदिति एव स्वीकृतवान् आचार्य सायणः । उपर्युक्तो यम् मंत्रः वाजसनेयि संहितायां[२५] चापि प्राप्यते । ऋग्वेदस्य विभिन्न स्थलेषु उत्तरायुगानि[२६] पूर्वाणि युगानि[२७] उत्तरे युगे[२८] चेत्यादयो युगस्य विविधाः प्रयोगा समुपलभ्यन्ते । युग शब्दस्य एतावद् उल्लेखेषु क्वचिदपि तस्य स्पष्टं कालमानो न निश्चीयते । वेदांग ज्योतिषे यस्य पंचसंवत्सरात्मक युगस्य वर्णनमस्ति तस्यैवाप्राप्य-भिप्रायो विद्यते । वेदे युग शब्दस्य प्रयोगः कस्यापि दीर्घकालस्यार्थं बोधाय विद्यत इत्येव निश्चितं ज्ञायते । परं कः स काल इति सुविदितं नास्ति । तैत्तिरीय संहितायामधो लिखितमन्त्रे कृतादि शब्दानामुल्लेखो दृश्यते यत्र तेषां स्तुति परक वर्णनमपि दृश्यते

'प्राची दिशां वसन्त ऋतूनामग्निर्देवता बल द्रविणं त्रिवृत्सोम स उ पंच दश वर्तनिस्त्र्यविर्वयः कृतमयानां------त्रेतायानां--------अभिभूरथामा'[२९]---------

वाजसनेयि संहितायां पुरुषमेधस्य प्रकरणे[30] कृतादीनां कृते मेध्य पुरुषाणां वर्णनं दृश्यते । मेध्य पुरुषवर्णनं तैत्तिरीय ब्राह्मणेपि दृश्यते, यथा --

"कृताय सभाविनं ।
त्रेताया आदि नवदर्शम् ।
द्वापराय वहि: सदम् ।
कलये सभास्थाणुम् ।"

उपर्युक्त मन्त्रयो: प्रथमे आस्कन्द इति चतुर्थनाम विद्यते । द्वितीये तु अस्य स्थाने कलि शब्दस्य प्रयोगो दृश्यते । एतेनात्रोभयशब्दयो: समानार्थं वाचकत्वमस्तीति संभाव्यते । अत्र मन्त्रद्वये मेध्यपुरुषे भेदस्य परिदर्शनं स्पष्टमेव वर्तते । परन्त्वत्र कलेरास्कन्दस्य च समान मेध्यस्यैवोल्लेखो विद्यते च एतयोरभेद कल्पनां दृष्यन्निव प्रतिभाति । प्रसंगादि विवेचनेनैतेषां प्रयोग: कस्यापि कालभागस्य कृते विद्यत इति नैव निश्चीयते । वेदार्थवाचकत्वमेव मुख्यतया प्रतिपादितमवलोक्यते । एतरेय ब्राह्मणे पि[31] कृतादि शब्दानामुल्लेखे कृतादिशब्दैरवावस्था विशेषाणामेव बोधो जायते । एतेषां कालवाचकतया प्रयोग: कुत्रचिदपि विद्यत इति नैव निश्चय एवं कथयितुं शक्यते । गोपथ ब्राह्मणे द्वापर शब्द: कालपरिमाण वाचको विद्यते इति श्री शंकर बालकृष्ण दीक्षित महोदयै: प्रोक्तम् ।[32] वेदत: परिवर्तित काल एवैतेषां कृतादि शब्दानां काल परिमाण वाचकतया व्यवहारस्येदमेव मूलमस्तीति सम्मतिस्तेषाम् ।

## :: वेदयुगस्य पंच संवत्सरात्मकत्वम् ::

वेदांग ज्योतिषस्याध्ययनेन युगस्य पंचसंवत्सरात्मकत्वस्य निश्चयो भवति । तत्रापि युगान्तरवर्त्तिनां पंच संवत्सराणां पृथक् पृथंनाम निर्देशो नैव दृश्यते । महाभारते पुराणेषु च बहुत्र तेषा नामानि दृश्यन्ते । वेदेषु तेषां पंचानां नामानि बहुत्र बहुधा प्राप्यन्ते । अस्मिन् विषये तेषां नैकमत्यमुपलभ्यते । अत्रोदाहारण रूपेण वैदिकमन्त्राणामुल्लेखो उचितएव ।

संवत्सरस्य तदह: परिष्ठयन्मण्डूका: प्रावृषीणां बभूव ।
ब्राह्मणास: सोमिनोवाचमक्रत ब्रह्म वृण्वन्त: परिवत्सराणाम् ।[33]

ऋग्वेदस्यैतस्मिन् मन्त्रे संवत्सर परिवत्सरयोरुल्लेखो विद्यते । अत्र द्वावपि कालवाचकौस्त इत्यपि स्पष्टमेव विदुषाम् । ऋग्वेदे संवत्सरपरिवत्सरयोरुल्लेखो बहुत्र दृश्यते परं चान्येषां त्रयाणां चर्चा नहि तत्र कुत्रचिदपि सम्प्राप्यते । वाजसनेयि संहितायां पंचानामप्युल्लेखो दृश्यते ।

"संवत्सरोसि परिवत्सरोसिदावत्सरोसी इद्वत्सरोसि ।[34]

तैत्तिरीय ब्राह्मणे प्येकत्र वत्सराणां नामोल्लेखस्य क्रम: पूर्वोक्त सदृश: एवास्ति, तत्रापि संवत्सरस्य पुनरुक्तिर्दृश्यते । अथ व च

अग्निर्वाव संवत्सर: । आदित्य: परिवत्सर: ।
चन्द्रमा इदावत्सर: । वायुरनुवत्सर: ।[35]

वेदकाल उपरिनिर्दिष्ट पर्यालोचनया वेदकाले संवत्सराणां नामक्रमयो: का स्थितिरासीदितिनिश्चितरूपेण नैव कथयितुं शक्यते । यज्ञविधिपराणामार्याणां संवत्सर-

ज्ञानमतीवाश्यकं महत्त्वपूर्णन्चासीत् । वैदिकै: संवत्सर सत्र संपादनाय संवत्सरस्य विविधा मीमांसा: समालोचिता पूर्वमेवोक्तमस्ति । यत् वैदिक संहितासु ब्राह्मणेषु च पंच संवत्सराणां नामानि प्राप्यन्ते । परं न तत्र तेषां कस्यापि नियमित चक्रस्योल्लेखो दृश्यते । श्रौत सूत्रेषु निदानसूत्रं पंचसंवत्सराणां वर्गस्य स्पष्टमुल्लेखो विद्यते । तत्र तेषां महत्त्वमपि सुष्ठु वर्णितमस्ति ।

पंच संवत्सरा वर्गा: । तेषु धीरो मनीषया कर्मणो उपसवो विधात् । संस्था विधिषु व्रतानि च ।[३६] संवत्सराणां वर्गस्य संपादनाय वेदवांगमये संवत्सरस्य षडविधा मीमांसिता । तत्र सावन संवत्सर: सर्वाधिक प्रसिद्धो गणनायां च सुकरो विद्यते । ज्योतिष सिद्धान्त ग्रन्थेषु केवलं सूर्यसिद्धान्त एवास्य विजयादि संवत्सरस्योपयोगो व्यवहृत: ।[३७] तत्र षट्सु संवत्सरेषु लधिष्ठ: ३२४ सावनात्मको नाक्षत्र संवत्सरो विद्यते । अत्रत्यं नाक्षत्रमेकं चन्द्रस्य एकनक्षत्र भोगकाल, एवं २७ दिवसैमासि: सम्पद्यते । एवमयं चान्द्रनक्षत्र संवत्सरो भवति । अयंच सावन संवत्सरत: षट्त्रिंशोन: संवत्सर: कथ्यते । अत्रैव १३ मासा: कल्प्यन्ते स: १३ +२७ =३५१, दिवसात्मको न्यो नवीनश्चान्द्र-नक्षत्र संवत्सरो निष्पद्यते ।[३८] तृतीयस्य संवत्सरो ३५४ सावनात्मको भवति । अयमेव तिथ्यात्मकश्चान्द्र संवत्सरो ज्योतिषे प्रसिद्ध: । अत्र द्वयोर्मासयोरेक सावनमासस्य नियमो स्ति । अर्थादत्र २९$\frac{१}{२}$ सावनात्मको मासो भवति । एवमयं षड्डून: षडहोनो वा संवत्सर: कथ्यते । अत्र ६० संख्यैका तिथिस्त्यज्यते । सम्प्रति ज्योतिषे ६४ संख्यैकस्य तिथेर्लोपो मन्यते । अयं तिथिलोपनियम: कृष्णयजुर्वेद उत्सर्गिणामयन सत्र प्रकरणे सुष्ठु प्रतिपादितो दृश्यते -

'अमावास्यया मासान् सम्पाद्य दृरुत्सृजन्ति, अमावास्याया हि मासान् सम्पश्यन्ति ।'[३९] एवं स्पष्टपणे विराजत्यपि ३५४ सावनात्मक चान्द्र संवत्सरस्य

वेदकाले परिज्ञातत्वे संदेह प्रकरणं मैकडोनेल महोदयस्य दौर्बल्यमेवाभिव्यंजयति । अत: पर: सावन: संवत्सरो विद्यते । ततश्च ३६६ सावनात्मक: सौर संवत्सरो भवति । एतद्विषये सर्वा: संहिता: ब्राह्मणग्रन्था न किमपि प्रतिपादयन्ति । लाट्यायन श्रौतसूत्रे[40] निदानश्रौतसूत्रे चास्य वर्णनं सम्यक्तया दरी दृश्यते ।

> "स एष आदित्य संवत्सरो नाक्षत्र: ।
> आदित्य: खलु शश्वदेवता द्विभरहोभिर्नक्षत्राणि समवैति ।
> त्रयोदशाहं त्रयोदशाहमेकैकं नक्षत्रमुपतिष्ठति ।
> अहस्तृतीयंच नवधा कृतयोरहो शत्रयो ट्टै ट्टै कले वेति संवत्सरा: ।
> ताश्चत्वारिंशत् चतु: पंचाशतं कला: ।
> ते षण्णव वर्गा: स षट् षष्टित्रिंशत: ।[41]

## : संवत्सर: अयनं ऋतव: मासाश्च :

पूर्वोक्तेषु षट्सु संवत्सरेषु सर्वेष्वपि यज्ञकार्ये समुपयुज्यमानेषु चत्वार एव ज्योतिर्विज्ञान सम्मता: । एते सावन:, चान्द्रनक्षत्र:, चान्द्र:, सौरश्च संवत्सरा विद्यन्ते । एषु सावन संवत्सरस्य कदापि प्रारम्भ कल्पने न को पि विशेषो स्ति सूर्योदयस्यैव तत्र नियामकत्वात् । चन्द्रस्य कलाया ह्रासवृद्धि दर्शनाच्चान्द्र संवत्सरस्यारम्भावज्ञानयोर्ज्ञानं सुकरम् । अतएव वेदेषु सावन-चान्द्रनक्षत्र संवत्सरयोरारम्भस्य को प्युल्लेखो न दृश्यते । सौर संवत्सरस्य प्रारम्भस्य स्पष्ट निर्देशोस्ति शतपथ ब्राह्मणे ।[42] ऋतुषु वसन्तस्य प्रथमोल्लेख दर्शनात्, तत एव सौरवर्षारम्भो विज्ञायते । अर्थात् मधुमासस्यारम्भात् एव संवत्सरारम्भ: । चान्द्र संवत्सरस्यारम्भे वेदे मतद्वयमुपलभ्यते । तद् यथा —

फाल्गुनी पूर्णमासे दीक्षेरन्
मुखं वा एतत्संवत्सरस्य ।
पांचित्रा पूर्णमासो मुखत एव
संवत्सरमारभ्य दीक्षन्ते ।[४३]

एवं चान्द्र संवत्सरस्यारम्भे फाल्गुनी पूर्णमासश्चित्र पूर्णमासश्चेति द्वे मते उपलभ्येते ।

अयनम् :

यदोत्तराभिमुख्यते सूर्यो तदोत्तरायणं यदा च दक्षिणाभिमुख्यते तदा दक्षिणायनं भवति । केषांचिन्मते सूर्यो यावत्कालं विषुवद्वृत्तात् दक्षिणायां दिशि प्रचलति तावान् कालो हि दक्षिणायनम् । यावत् कालं च तत् उत्तरतः प्रचलति तावान्कालोह्युत्तरायणं भवति । परंमतमिदं नाद्रियते । वेदेपि पूर्वमत प्रतिपादक वचनमेवोपलभ्यते । यान् षण्मासान् दक्षिणा दित्य एति, यान् षण्मासानुद दित्य एति । छन्दोगा अपि यान् षडदक्षिणेति मासास्तान् यान् षडुदगेति मासास्तान् । शतपथ ब्राह्मणे पि वसन्तो-ग्रीष्मो-वर्षा । ते देवाः ऋतवः, शरद्धेमन्तः शिशिरस्ते पितरो । स यत्रोदगावर्तते देवेषु तर्हि भवति ।[४४] अत्र उद्गावर्तते चे दक्षिणावर्तत इत्यनेन विषुववृत्तादुदंदिशि च गच्छतीत्यर्थः श्रीयुत शंकर बालकृष्णादीक्षित मतम् ।[४५] कौषीतकि ब्राह्मणस्य मतमेतत् सम्बन्धे प्रथमाश्रयस्य पक्ष एव स्पष्टमस्तीति ताभ्यां दृष्टमास्ति । उत्तरे ध्रुवे देवानां निवासो वर्तते, दक्षिणे च पितृणां तेनतयोः क्षितिजं वषुववृत्तमेव भवति । अतो विषुववृत्तादुग्गते खौ देवानां दिनं पितृणां च रात्रिः । एवं विषुवत् वृत्ताद् दक्षिणागते खौ पितृणां दिनं देवानां च रात्रिर्भवति । अर्थादुत्तरदक्षिण गोलयोर्देवानां पितृणां च विपर्यासेन दिनरात्री भवतः ।

परं च पुराणेषु सौम्ययाम्यगोलयोः स्थाने सौम्य याम्यायनयोरेव देवपित्र्योर्विपर्यासेन दिनरात्रि व्यवस्था प्रतिपादिता । एतद्विरुद्ध कथनस्य को हेतुरिति नैव विज्ञायते । शतपथ ब्राह्मणस्योपर्युक्त वाक्येषु उदगावर्तते, दक्षिणावर्तते इत्यनेनोत्तर दक्षिण-गोलयोरेवाभिप्रायो विद्यते । यतस्तत्र वसन्त-ग्रीष्म-वर्षासु देवभागे शरद्धेमन्त शिशिरेषु च पितृभागे सूर्यस्यावस्थितिर्वर्णिता विद्यते । ~~यतस्तत्र-वसन्त~~ अतश्चात्र श्रीयुत शंकर बालकृष्ण दीक्षितस्य व्याख्या समुचितैवास्ति ।

ऋतवः :

वैदिक साहित्यस्य सम्यगध्ययनेन ऋतुसंख्या षडेवस्तीति निश्चीयते । यथोक्तं शतपथ ब्राह्मणे —

"वसन्तो ग्रीष्मो वर्षा । ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो---------" ।[४६] यत्र तत्र वेदे "पंच वा ऋतवः संवत्सरः इत्युल्लेखो दृश्यते ।[४७] वेदे यत्र पंचानामेव ऋतुनामुल्लेखो विद्यते तत्र हेमन्तशिशिरयोरैक्यस्याभिमतं भवति ।

"द्वादशमासाः पंचऋतवो हेमन्त शिशिरयोः समासेन ।"[४८]

मासाः :

वैदिक वाङ्मये द्वादश त्रयोदश वा मासा इति वर्णनं बहुत्र दृश्यते, यदा कदा चतुर्दश मासाः संवत्सर इति वेदे लेखः समुपलभ्यते । एतेनेदं तु निश्चीयते यच्चान्द्रा एव मासाः संभवितुमर्हन्ति, सौरमासानां द्वादशाधिक संख्याया असंभवात् । द्वादशरात्रि-दीक्षितः स्यात् द्वादशमासाः संवत्सरः । त्रयोदश रात्रिर्दीक्षितः स्यात् त्रयोदश मासाः

संवत्सर: [४९] एवं वेदे मासानां चतुर्दश नामान्यपि श्रूयन्ते ।

"मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयाम गृहीतोऽसि संसर्पोऽहस्पत्याय त्वा ।" [५०] संसर्प शब्देन मलमास:, अहंस्पति शब्देन च क्षयमासो गृह्यते । एवं वेदे प्रधानतया मासाश्चान्द्रा एव विद्यन्ते । परंच सौरमासस्यापि संकेतस्तत्र समुपलभ्यते । वेदकाले मासानां मधुमाधवादय: पर्याया एव विशेष प्रचलिता आसन् । तदानीं मासानां चैत्र वैशाखादि नक्षत्र मूलक नाम्नां प्रयोगोनैव दृश्यते । मासानां नक्षत्रमूलकनामसु चैत्र वैशाखादिषु पौषमाघश्रावणानां त्रयाणां प्रयोग: सर्वप्रथमं याजुष ज्योतिषे दृश्यते । अतस्तदानीं मासान्तराणामपि नक्षत्रमूलकनामानि प्रयुज्यमानानि दृश्यन्ते ।

<u>पक्ष :</u>

वेदे क्वचिद् पूर्णिमान्तो क्वचिच्चामान्तो मासो वर्णितो दृश्यते ।

"अमावास्ययामासान् सम्पाद्यहरुत्सृजन्ति पौर्णमास्या हि मासान् सम्पश्यन्ति ।" [५१] अत्र स्पष्टमिदं कथितमवलोक्यते यत्केचिदमावस्यया मासपूर्तिं सम्पश्यन्ति । केचिच्च पौर्णमास्या तत्पूर्तिं समामनन्तीति । सम्प्रति दक्षिण भारते पूर्वं नियम, उत्तरभारते चोत्तर नियमो मन्यते । तदुभयमपि मतं वैकमस्तीति उपर्युक्त मन्त्रेणैव निश्चीयते । मासस्यपूर्वापरपक्षयोर्विचारे कर्तव्ये सति पूर्णिमान्तमान्त भेदेन द्वैविध्य दर्शनात् पक्षे पितद् द्वैविध्यं स्वत: समापतति । मासस्यामान्तत्वे स्वीकृते प्रथमं शुक्लपक्ष: पश्चाच्च कृष्णपक्ष: । एवं तस्य पूर्णिमान्तत्वे सति प्रथमं कृष्णपक्ष: पश्चातच्छुक्लपक्ष: । यथा च श्रूयते पूर्वपक्षं देवा न्वसृजन्त । अपरपक्षान्वसुरा: ततो देवा अभवन् परासुरा: [५२], अर्थात् पूर्वपक्षे देवा अजायन्त, पर पक्षे चासुरा: । तेन देवानां विजयो भूत असुराणां च पराजय: । अत्र विचारेण स्पष्टमिदमेवावसीयते,

यद् देवानां पूर्वपक्षः शुक्लपक्षो विद्यते, असुराणां परपक्षश्च कृष्णपक्षः ।

तिथयः

वेदे यद्यपि कालवाचक शब्दानामुल्लेखो वर्णनं वा वैदिकसाहित्ये बहुलतयोपलभ्यते । तथापि तिथि शब्दस्योल्लेखो न तथा दृश्यते । तिथेरुल्लेखः केवलमैतरेय ब्राह्मणे समुपलभ्यते । यत्र तिथेराधुनिको र्थः न दृश्यते । वेदे सर्वतिथीनां समुल्लेखो नैव प्राप्यते परं चामावस्या पूर्णिमयोर्विषये पंचदशीति प्रयोगदर्शनात् तिथेराधुनिक स्वरूपस्य ज्ञानं वेदकाले प्रमाणितं भवति । वेदे यत्र यत्र प्रसंगात् तिथीनां प्राप्यन्ते । सामविधान ब्राह्मणे कृष्णाचतुर्दश्याः, कृष्णपंचम्याः कृष्णाचतुर्दस्याश्चोल्लेखो दृश्यते । पूर्णिमायाममावस्यां यदा कदा सहाष्टकायाः प्रयोगो दृश्यते, यत्र अष्टम्या अर्थो गृह्यते ।

मुहूर्तः

वेदे दिनरात्र्ययो पंचदश भागात्मकानां मुहूर्तानां कल्पना विद्यते । परं तत्रेदं वैशिष्ट्यमवलोक्यते यच्छुक्लपक्षस्थ दिन रात्र्योर्मुहूर्तानां संज्ञाः कृष्णपक्षस्य दिन रात्र्यो मुहूर्तानां संज्ञाश्च भिन्नाः भिन्नाः सन्ति ।[५३] यथा दिवसस्य पंचदशविभागात्मकः कालो मुहूर्तः कथ्यते । तथैव मुहूर्तानामपि पंचदशविभागात्मक कालः प्रतिमुहूर्तः कल्पितः । पूर्वं तु पक्ष क्रमेण दिन-रात्रि क्रमेण च मुहूर्तानामपि पंचदश विभागात्मक कालः प्रतिमुहूर्तः कल्पितः । पूर्वं तु पक्षक्रमेण दिनरात्रिक्रमेण च मुहूर्तानां चतुर्धा नामधेयानि प्रतिपादितानि सन्ति । वेदकाले कालस्य सूक्ष्मातिसूक्ष्मविभागानामपि कल्पना दृश्यते । शतपथ ब्राह्मणस्याधोलिखितानुवाके कालस्य सूक्ष्मातिसूक्ष्म विभाग परम्पराया उल्लेखो दृश्यते ।

'यावन्तो मुहूर्तास्तावन्ति पंचदश कृत्वः क्षिप्राणि यावन्ति तावन्ति

पंचदश कृत्व एतर्हीणि यावत्यैतर्हीणि तावन्ति पंचदश कृत्व इदानीनि यावन्तीदानीति तावन्त: पंचदश कृत्व: प्राणा यावन्त: प्राणास्तावन्तो ना यावन्तो नास्तावन्तो निमेषा, यावन्तो निमेषास्तावन्तो लोमगर्ता यावन्तो लोमगर्तास्तावन्ति स्वेदायनानि यावन्ति स्वेदायनानि तावन्त एते श्लोका वर्षन्ति ।[५४]

अथात्र विषयस्य सुलभतया ज्ञानायोपर्युक्त वाक्यानुसारेण एकासारणी प्रस्तूयते ।

| | |
|---|---|
| १ दिनम् | = ३० मुहूर्ता : |
| १ मुहूर्त: | = १५ क्षिप्राणि |
| १ क्षिप्र | = १५ एतर्हीणि |
| १ एतर्हि | = १५ इदानीति |
| १ इदानि | = १५ प्राणा: |
| १ प्राण: | = अना: |
| १ अन: | = निमेषा: |
| १ निमेष: | = लोमगर्ता: |
| १ लोमगर्त: | = स्वेदायनानि |
| १ स्वेदायनम् | = १५ स्तोका: |

शांखायनारण्यके पि एतादृशी सारणी दृश्यते

--

## — वेदे वर्णिता ग्रहाणां संस्था —

प्रथमतः शतपथ ब्राह्मणे ग्रहशब्दस्य विवेचनं कृतमवलोक्यते । यत्र प्रजा ग्राहकत्वाद् सूर्यो ग्रहशब्देनाभिहितः ।

एव वै ग्रहः । य एष तपति येनेमाः सर्वाः प्रजा गृहीतास्तस्मादाहुर्ग्रहान् गृह्णीय इति चरन्ति ग्रह गृहीताः सन्त इति ।[1] वैदिक ग्रन्थेषु यद्यपि ग्रहाणां संस्था स्पष्टरूपेण कुत्रचिदपि समुल्लिखिता नैव दृश्यते । ऋग्वेदे पंचदेवानां वर्णनं संप्राप्यते ।[2] तैत्तिरियारण्यके सप्तसूर्याः इति प्रयोगे सप्तग्रहाणामाशयः संभाव्यते । ग्रहास्तु सर्वदैव नोदीयमानास्तिष्ठन्ति । तेनात्र मन्त्रे ऋतुशः अर्थात् काले काले इति प्रयोगो दृश्यते । एवमित्रस्मिन् मन्त्रे पंचदेवानां वर्णनं पंचग्रहाणामेवाशयं सम्भावयति । यदेकत्र समुदितमस्ति यद् देवा नक्षत्राणां मध्ये तिष्ठन्ति । यतस्तानि तेषां गृहाणि विद्यन्ते देवगृहावै नक्षत्राणि ।[3] प्रायः सम्पूर्णे वैदिक साहित्य सूर्यस्य चन्द्रस्य च वर्णनं समुपलभ्यते । अथर्ववेदे चन्द्र सूर्ययो राहुकृत ग्रहणस्योल्लेखो दृश्यते । तथैव धूमकेतोरपि चर्चा दृश्यते ।[4] वैदिक साहित्ये मंगलस्योल्लेखो न हि कुत्रापि स्पष्टतया दृश्यते । दुर्गाचार्येण निरुक्तभाष्ये भूमिज शब्दस्य व्याख्यां भूमेरुत्पन्न इति लिखितमस्ति । यत्र मंगल ग्रहस्यार्थे केवल यास्कस्योल्लेखो दृश्यते । वैदिक साहित्ये बृहस्पतेवर्णनं देवरूपेण विद्यते । बृहस्पतेवर्णनं ऋग्वेद संहितायामेवावलोक्यते ।

बृहस्पतिः प्रथमंजायमानो महाज्योतिषः परमे व्योमन् ।[5] इत्यादि विवेचनैरिदं स्पष्टं संजायते । यदुपर्युक्तं वैदिक वाङ्मयोरूपवर्णितो बृहस्पतिर्बृहस्पति

ग्रह: एव विद्यते । शुक्रस्य समालेखो वैदिक संहितासु नैवोपलभ्यते । परं तु ब्राह्मण ग्रंथेषूपलभ्यते । शतपथ ब्राह्मणस्याधो लिखित वाक्येषु शुक्रस्योल्लेखो दृश्यते ।

"चक्षुषी ह वा अस्य शुक्रामन्थिनौ ।
तद्वा एव शुक्रो य एष तपति तद्देष
एतज्जति तेनैष शुक्रश्चन्द्रमा एव मन्थी ।"[६]

अत्र शब्दार्थ विचारेण शुक्रोमंत्री च पृथक् डा० पिण्डो विद्यते इति स्पष्टं बुद्धिपथमवतेरति । अत्र चन्द्रमा मंत्री रूपेण वर्णितो स्तीति स्मरणीयमास्ति । अथर्ववेद संहितायामेकत्रैव ग्रह शब्दस्य द्विधा प्रयोगो दृश्यते ।

"शं नो विविचरा ग्रहा: ।
शं नो ग्रहाश्चान्द्रमसा: शमादित्याश्च राहुणा ।"[७]

अथर्ववेदे निर्हतोल्काधूमकेत्वादीनामान्तरिक्षोत्पाताना बहुधा वर्णन मुपलभ्यते । एवं वैदिक युगे पंच ग्रहाणां ज्ञानेन सह धूमकेत्वादीनां पार्थिवान्तरिक्षोत्पातानां चापि ज्ञानमवलोक्यते । शनि बुधयोरतीव सूक्ष्मतत्वाद् वेदकाले तयो: परिचयो नोपलभ्यते।

## :नक्षत्राणि:-नक्षत्राणां क्रम: तन्नामानि ::

प्रथमत: ऋग्वेदे नक्षत्राणां षट् संख्या विद्यते । तत्पश्चादन्य वेदेषु सप्तविंशति नक्षत्राणामुल्लेखो दृश्यते । अनन्तरं चाभिजितो पि तत्रैव संनिवेशो

जातस्तेनाष्टाविंशति संख्याया ग्रहणमपि प्रचलितम् । अतएव साभिजित् गणना वैदिकीमित्यपि पश्चाद् वर्तिनी विज्ञायते । नक्षत्राणां क्रमे वेदे सर्वत: कृत्तिकादेव प्रारभ्यते । एतत्क्रमनिर्धारणस्यैतिहासिक दृष्टयातीव महत्वमस्ति । एतेन स्पष्टतया विज्ञातं भवति यत् वेदकाले कृत्तिकायामेव वसन्त सम्पात आसीदिति । वैदिक साहित्यस्य बहुषु ग्रन्थेषु नक्षत्राणां सूच्यो विद्यन्ते, यानुक्रमिकरूपेण तेषां नाम देवत्योर्वर्णन मुपलभ्यते । तैत्तिरीय संहितायामेतादृशी सूची दृश्यते —

कृत्तिका नक्षत्रमग्निर्देवता अग्ने रुच: स्थ
प्रजापतेर्धातु: सोमस्यर्चे त्वा रुचे, त्वाद्युते,
त्वा भासे, त्वा ज्योतिषे, त्वा रोहिणी नक्षत्रं
प्रजापतिर्देवता मृगशीर्षनक्षत्रं सोमो देवता आर्द्रा नक्षत्रं

रुद्रो देवता पुनर्वसुनक्षत्रमदिर्देवता इत्यादिषु नक्षत्राणां नामसु एकवचन, द्विवचन बहुवचन प्रयोगात् तेषां तारा संख्याश्च आसीदिति ।[८] एतादृशी सूची तैत्तिरीय ब्राह्मणे पि दृश्यते । नक्षत्राणां नाम देवत्योर्वर्णनमस्ति ।[९] तैत्तिरीय ब्राह्मणे अन्यत्र अपि विस्तार रूपेण नक्षत्राणां नाम देवतानामुल्लेखो विद्यते ।[१०] शतपथ ब्राह्मणे पि नक्षत्राणां सप्तविंशति संख्याया उल्लेखो विद्यते । यत्रोपनक्षत्राणामपि निर्देश उपलभ्यते ।[११] अथर्ववेदे या सूची समुपलभ्यते । तत्र नक्षत्राणामष्टाविंशतेरुल्लेखो दृश्यते ।[१२] तैत्तिरीय ब्राह्मणस्यैकस्यां सूच्यां देवनक्षत्राणि यमनक्षत्राणीति रूपेण नक्षत्रचक्रस्य द्विधा विभाजनमस्ति, यत्र कृत्तिकात: प्रथमचतुर्दश नक्षत्राणि देवनक्षत्राणि, अनन्तरं त्रयोदश नक्षत्राणि च यम नक्षत्राणि कथ्यन्ते । वेदे सर्वत्र नक्षत्रसूचीनां कृत्तिकात एव समारम्भ श्रवणादत्र च देव यम रूपेण द्विधा विभाजन दर्शनात् वेदकाले नक्षत्र चक्रस्यारम्भो यत् नाडी क्रान्तिवृत्तयो: प्रथम सम्पात: कृत्तिकायामेव समासीदिति

प्रतीयते । तैत्तिरीय ब्राह्मणे सम्पूर्ण नक्षत्रचक्रं प्रजापते रूप श्रुतमस्ति । यत्रास्याः कल्पनायाः पूर्णतार्थं प्रजापतेरंगेषु नक्षत्राणां संनिवेशः कृतो वलोक्यते ।

"यो वै नक्षत्रियं प्रजापतिं वेद ।
उभयोरेनं लोकयोर्विदुः, हस्त एवास्य हस्तः ।
चित्रा शिरः । निष्ट्या हृदयं । ऊरू विशाखे । प्रतिष्ठानुराधाः ।
एष वै नक्षत्रियः प्रजापतिः । [13] नक्षत्राणां विषये विशेष

प्रतिपादनार्थमेकैकशः सर्वेषां स्वरूप विवेचनं विधास्यते । अत्रापि स एव क्रमो गो कृतो विद्यते येन क्रमेण वेदेषु वर्णितमस्ति । अत्र मुख्यतया मैत्रायणी[14] तैत्तिरीय[15] काठक-संहितानामाधारेण नक्षत्राणां तारासंख्याया लिंगवचनयोश्च क्रमेण विधास्यते । वैदिक नक्षत्राणां कृत्तिकासमारंभात् अत्रापि तस्मादेवारभ्य वर्णितं दृश्यते । उपर्युक्त सूच्यनुसारेण वेदेषु कृत्तिका नक्षत्रं स्त्रीलिंगे श्रुतमस्ति । बहुवचन प्रयोगोपलब्धेरस्मिन् बह्वीनां तारकाणां संभावना लक्ष्यते । तैत्तिरीय ब्राह्मणस्याधोलिखित ब्राह्मणमस्मिन् विषये विशेषरूपेणोल्लेखनीयमस्ति ।

"अम्बायै स्वाहा, दुलायै स्वाहा ।
नितत्न्यै स्वाहा, अभ्रयन्त्यै स्वाहा ।
मेघयन्त्यै स्वाहा, वर्षयन्त्यै स्वाहा ।
चुपुणिकायै स्वाहा । [16]

एतस्य प्रसंगादीनां विचारेण निश्चीयते, यदत्र अम्बादयः ~~सप्त~~ सप्त कृत्तिकाया एव तारकाणां नामधेयानि सन्ति, येषामभिप्रायेणात्र स्वाहाकाराणामुक्तिर्विद्यते ।

सप्तर्षयः

शतपथ ब्राह्मणे सप्तर्षीणामृक्ष शब्देन व्यवहारो दृश्यते । [17] पदस्याकार-

दर्शनेनोपयुक्तमनुभाति सप्तर्षीणां पाश्चात्य संज्ञापि प्रायशो मुमेवार्थं घोतयति ।

राशिनां प्राचीनत्वम् ।

राशिनां प्राचीनत्व विषये वेद, वेदांग, श्रुति, स्मृति, रामायण पुराणादिनषु ग्रन्थेषु राशि विषयकं चर्चा वर्णितं दृष्यते । यथा -

वामन पुराण अध्याय -५

नारदउवाच ।

कालरूपी त्वया ख्यात: शम्भुर्गगनगोचर: ।
लक्षणं च स्वरूपं च सर्वं व्याख्यातुमर्हसि ।।२९ ।।

पुलस्त्य उवाच ।

स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिण: ।
येनाम्बरं मुनिश्रेष्ठ । व्याप्तं लोकहितेप्सुना ।।३०।।
यत्राश्विनी च भरणी कृत्तिकायास्तथां शक: ।
मेषो राशि: कुजक्षेत्रं वच्छिर: कालरूपिण: ।।३१ ।।
आग्नेयांशास्त्रयो ब्रह्मन् । प्राजापत्यं कवेर्गृहम् ।
सौम्यार्द्ध वृषनामेदं वदनं परिकीर्तितम् ।।३२ ।।
मृगार्धमार्द्रा दित्यां शास्त्रय: सौम्यगृहंत्विदम् ।
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिन: ।।३३ ।।
आदित्यांशश्च पुष्यश्च आश्लेषा राशिनो गृहम् ।
राशि: कर्कटको नाम पार्श्वे मखविनाशिन: ।।३४ ।।
पित्र्यर्क्ष भगदैवत्यमुत्तरांशश्च केशरी ।
सूर्यक्षेत्रं विभोब्रह्मन् । हृदयं परिगीयते ।। ३५

उत्तरांशास्त्रयः पाणिश्चित्रार्धं कन्यकात्विदम् ।
सौमपुत्रस्य समेतद् द्वितीयं जठरं विभौ ।।३६ ।।
चित्रांशं द्विषयं स्यातिर्विशाया अंशकत्रयम् ।
द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता ।।३७ ।।
विशाखांशश्चानुराधं ज्येष्ठा भौमगृहं त्विदम् ।
द्वितीयो वृश्चिको राशि मेंढ कालस्वरूपिणः ।।३८ ।।
मूलं पूर्वोत्तरांशश्च देवचार्यगृहं त्विदम् ।
ऊर्वोर्युगलमंशस्यापरार्धं च प्रगीयते ।।३९ ।।
उत्तरांशास्त्रदमं च रूवर्णं मकरो मुने ।
धनिष्ठा ध शनिश्चैत्रं जानुनी परिकीर्तिते ।।४० ।।
धनिष्ठार्धं शतभिषा प्रोष्ठपादांशकत्रयम् ।
सौरेः समापरमिदं कुम्भो जडे च विश्रुते ।।४१ ।।
प्रोष्ठपादांश एकस्तु उत्तरा रेवती तथा ।
द्वितीयं जीवसदनं मीनस्तच्चरणा वुभौ ।।४२ ।।

वेदांग ज्योतिषे भगणास्वरूपम् ।

वेदांग ज्योतिषस्य विषये इदं महद् वैचित्र्यं वर्तते । यत्तत्र पंचसंवत्सराणां नामानि कुत्रापि न वर्तन्ते । यद्यपि तान्येवास्य प्रतिपाद्यानि । अस्य भाष्यकारः सोमाकरो गर्गवाक्येषु पंच संवत्सराणां नामानि देवताश्चैवं प्रतिपादितवान् ।

| | १ | २ | ३ | ४ | ५ |
|---|---|---|---|---|---|
| संवत्सर नामानि । | संवत्सरः | परिवत्सरः | इदावत्सरः | अनुवत्सरः | इद्वत्सरः |
| देवताः | अग्निः | अर्कः | वायुः | चन्द्रमाः | मृत्युः |

वेदांग ज्योतिषे युगभगणाद्यः ।

युगे पंच संवत्सरा भवन्ति । तेन रविवर्षाणि =५ एतावन्त एव रवि भगणाः । अतः रविमासाः =१२x५ = ६० (षष्टिः) पृथकेन, द्विकेन सप्तभिश्च युता सती क्रमेण, युगीयाः सावनमासाः = ६१, चान्द्रमासाः = ६२, एवं नाक्षत्रमासाः = ६७, द्वित्रिंशद्सावनस्यीर्द्धः = $\frac{30+2}{2}$ =३० अर्थात् सूर्यस्य सप्तविंशति नक्षत्रभोगकालः सौरवर्ष भवति । ३६६ दिनानां सौरशब्दो भवति । वर्षे द्वादश सौरमासाः भवन्ति । वेदांगकाले एकस्मिन् सौरवर्षे ३७२ चान्द्रतिथ्यो भवन्ति । अथ एकायने १८६ तिथ्यो भवन्ति । अत्र यदि तिथि संख्या त्रिंशता भज्यते तदाशेषं षट् तिथयः उपलभ्यन्ते ।

## महाभारते ज्योतिष चर्चा

यथा कृतयुगादीनां नामानि वेदे समुपलभ्यन्ते, एतद् युगपद्धतेः चर्चा महाभारते बहुत्र वर्णितास्ति ।[१८] महाभारते स्पष्टरूपेण महाकल्पशब्दस्य प्रयोगो दृश्यते । ब्रह्मकल्प शब्दस्य चर्चापि महाभारते उपलभ्यते । एवं वर्तमान युग पद्धतेः कल्पना महाभारते पूर्णतां प्राप्तवती सन्दृश्यते । महाभारते पंचवर्षीय युगपद्धतेरपि वर्णनं प्राप्यते । पाण्डवानामेकैकस्य जन्म पंचवर्षेषु एकैक क्रमेण संजातमित्याशयकः श्लोको महाभारते सन्दृश्यते । —

अनुसंवत्सरं जाता
अपिते कुरु सप्तमाः ।
पाण्डुपुत्रा व्यराजन्त
पंच संवत्सरा इव ।।[१९]

गुप्तवासत: प्रकटेषु पाण्डवेषु निश्चितावधेरपूर्तिर्मत्वा पुनरेव पाण्डवैर्वनवासो विधेय इति मन्यमानं दुर्योधनं प्रति भीष्मस्य कालगणनात्मकं वचनमिदं महत्वपूर्णमास्ति ।

"तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात् ।
पंचमे पंचमे वर्षे द्वौ मासावुपजायत: ।।
एषामभ्यधिका मासा: पंच च द्वादशक्षपा: ।
त्रयोदशानां वर्षाणामिति मे वर्तते मति: ।।[20]

एवमेभिर्व्यावहारिक वचनै: स्पष्टमिदं निश्चीयते । यन्महाभारतकाले पंचवर्षीय युगपद्धतेर्व्यवहारासीत् वर्तमान युगपद्धतेरसत्यपि न तथा तदुल्लेखो दृश्यते ।

उपर्युक्त भीष्मवचनमेव तत: पूर्वं निम्नलिखिते श्लोकद्वये विभिन्नकालभागानां चर्चा सद्य लोचनपथमवतरति यथा —

"कलाकाष्ठाश्च युज्यन्ते मुहूर्ताश्च दिनानि च ।
अर्द्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा ।।
ऋतवश्चापि युज्यन्ते तथा संवत्सरा अपि ।
एवं कालविभागेन कालचक्रं प्रवर्तते ।।[21]

महाभारते श्रवण नक्षत्रादिगणनया अपि समुल्लेख: प्राप्यते । कृत्तिकादिक्रमेण सप्तविंशति नक्षत्राणां वर्णनं महाभारते दृश्यते ।[22] महाभारते सूर्यचन्द्रयोरुल्लेखाद-नन्तरं षण्णामेव ग्रहाणां नामोल्लेखो दृश्यते । तत्र क्रमश: शुक्र:, गुरु, बुध, भौम, शनैश्चर राहूणां नामानि समुल्लिखितानि अवलोक्यन्ते । चायमासस्य समुल्लेख: सर्वप्रथमं

महाभारते दृश्यते । इत: पूर्वं कस्मिंश्चिदपि ग्रन्थे क्षयमासस्य स्पष्ट निर्देशो नास्ति ।
~~क्षयं संवत्सराणां च मासानां च क्षयं तथा । पक्ष~~

क्षयं संवत्सराणां च मासानां च क्षयं तथा ।
पक्षक्षयं तथा दृष्ट्वा दिवसानां च संक्षयम् ।।[२३]

अत्र मास क्षयस्य कथनमतिशयं महत्वपूर्णं वर्तते । यतो नेन महाभारतकाले स्पष्टगतेर्ज्ञानस्य संसिद्धिर्जायते । अत्रेदं स्मरणीयं यन्मध्यमानेन चान्द्रमासादेक्षयासौरमासस्य सर्वं देवाधिक्त्वात् क्षयमासो कदाचिदपि न घटते । ग्रहणां वक्रत्वादि विषये महाभारतं सुपरिचितं संलक्ष्यते । एकत्र लोक संहारकलक्षणानां वर्णने ग्रहस्य वक्रानुवक्र्यो : ग्रह युद्धस्य धूमकेतोश्चेत्यादीनां समुल्लेखो दृश्यते ।

## स्मृतिषु ज्यौतिषतत्वम् ।।

ज्यौतिषस्य एव किंचिद् विकसितं तत्वं स्मृति साहित्ये समुपलभ्यते ।इयं युग पद्धतिर्मनुस्मृतौ निम्नप्रकारेण दृश्यते । एषा पद्धतिर्ब्रह्मणो दिनरात्रिमानयोर्निश्चयार्थं प्रतिपादिता स्ति । अत्र वर्षसंख्या दैवमानेन विद्यते । यथा –

| युगसंज्ञा: | युग संध्या दिव्यवर्षाणि | युगमानम् दिव्यवर्षाणि | युगसंध्यांश: दिव्यवर्षाणि | ससन्ध्य: युगमानं दिव्यवर्षाणि |
|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ |
| कृतयुगम् | ४०० | ४००० | ४०० | ४८०० |
| त्रेतायुगम् | ३०० | ३००० | ३०० | ३६०० |
| द्वापरयुगम् | २०० | २००० | २०० | २४०० |
| कलियुगम् | १०० | १००० | १०० | १२०० |
| योगमानम् | १००० | १०००० | १००० | १२००० |

मान संवत्सरो देवानामहंतीति समुल्लेखो वेदे तैत्तिरीय ब्राह्मणे समुपलभ्यते । अतः एकं देववर्षं ३६० मानवर्षैः समं स्यात् । मनुस्मृत्यनुसारेण १०० देवयुगानि = १२००० ब्रह्मदिनं = १२००००० देव वर्षाणि । ७१ देवयुगानि =१ मन्वन्तरमानम् ।
पूर्वरीत्या १ देववर्षम् =३६० मानववर्षाणि ।
१२००००० + देववर्षाणि = ४३२०००००० मानववर्षाणि =१ ब्रह्मदिनम्
एतावद्वर्षाणामपि ब्रह्मणो रात्रिरपि भवति । ब्राह्मण आयुषो विषये मनुस्मृते नैव किंचिल्लिखितमस्ति । याज्ञवल्क्य स्मृतौ कृतादि युगानां मानादि निरूपणं नामानि च नैव वर्तन्ते । बृहस्पतेः संस्कार प्रकाशे व्यासस्मृतौ[२५] च नक्षत्राणामुल्लेखो विद्यते । याज्ञवल्क्य स्मृतौ निम्नलिखित वाक्ये विषुववृत्तः सूर्य संक्रमणस्यचापि समुल्लेखो वर्तते ।

अमावस्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मण सम्पत्तिर्विषुवत् सूर्य संक्रमः ।।[२६]

याज्ञवल्क्यस्मृतौ निम्नलिखित श्लोके नवग्रहाणां नामान्युट्टंकितानि सन्ति —

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ।
शुक्र शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः ।।[२७]

याज्ञवल्क्यस्मृतेः सप्तर्षीणां तथा च सर्वप्रथमं नक्षत्रवीथीनांच चर्चा दृश्यते ।

## :: पुराणे ज्योतिष तत्वस्य विमर्शः ::

पुराणेष्वपि ज्योतिषतत्वस्य विकसितं शास्त्रीयं च स्वरूपमवलोक्यते। नारदपुराणे[२८] अन्यपुराणापेक्षया ज्योतिषतत्वस्य काचिदधिका चर्चा दृश्यते।[२९] ~~अन्येष पुराणेष्वपि ज्योतिषशास्त्रस्य~~
अन्य पुराणेषु मुख्यतया त्रुटेरथवा निमेषादारभ्य ब्रह्मायुः पर्यन्त कालस्य ध्रुवस्य, प्रवहादि सप्तवायूनां, सूर्यादि नवग्रहाणां तद्रथानां गतीनां, नक्षत्रवीथीनाञ्चेति ज्योतिष विषयाणां सामान्य वर्णनानि प्राप्यन्ते। पुराणेषु कालमान विषये महती विभिन्नता दृश्यते। इयं विभिन्नता मुख्यतया मुहूर्तादधः स्य कालमानेष्वेव दृश्यते। तदनन्तरं ब्रह्मादिमानात्मक मान पर्यन्तं सर्वत्र मतैक्यमस्ति। ब्रह्मपुराणे धौलिखित क्रमेण कालमानमुपलभ्यते।

| | |
|---|---|
| १५ निमेषा | =१काष्टा। |
| ३० काष्टा | = १कला। |
| ३० कला | = १ मुहूर्तः। |
| ३० मुहूर्ताः | = १ अहोरात्रम्। |
| ३० अहोरात्राणि | = द्वौपक्षौ = १ मासः। |
| | = कृष्ण शुक्ल भेदेन १ मासः। |
| | = पितृणामहोरात्रम्। |
| ६ मासः | = १ अयनम्। |
| २ अयने | = १ वर्षम्। |

इदमेव सौम्यायन- याम्यायन भेदेन देवानां दिनरात्री, दैत्यानांच रात्रिदिने भवत: ।

३६० मानववर्षाणि = १ दिव्यवर्षम् ।

अत: परं सर्वं युगमानं मनुस्मृतिवद्‌ज्ञेयम । तत: परं ७१ महायुगानि = १ मनु: । प्रथममनोरारम्भे तथा द्वितीयादौ मनूनां संधिषु च कृत युगमिता: सन्ध्यौ भवन्ति । तेन चतुर्दश मनूनां पंचदश सन्ध्यौ भवन्ति । वायु पुराणस्य वायवीय संहितायां विष्णुपुराणानुसारेण सर्वं कालमानं विद्यते । पद्‌मपुराण ब्रह्मपुराणयो: स्फुटरूपेण कुत्रापि कालमानसूची नैव विद्यते । परं प्रसंगवशेन यत्र तत्र सर्वेषां कालविभागानां चर्चा समुपलभ्यत एव ।

श्रीमद् भागवते जगतश्चरमो शो न्यैन संयुक्तो व्यक्त: परमाणु: कथ्यते ।[30] सूर्यो यावता कालेन परमाणुदेशमतिक्रामति सोऽपि परमाणुरेव निगद्यते ।

तत: २ परमाणु = १ अणु: ।

३ परमाणव: = १ त्रसरेणु: ।

अयमेव त्रसरेणु: जालार्करश्मयवगत: ।
खे पतन्नुत्पतन्संदृश्यते अग्रे ।

| | |
|---|---|
| ३ त्रसरेणव: | = १ त्रुटि: । |
| १०० त्रुट्य: | = १ वेध: । |
| ३ वेधा: | = १ लव: । |
| ३ लवा: | = १ निमेषा: । |

| | | |
|---|---|---|
| ३ निमेषाः | = | १ क्षणः । |
| ५ क्षणाः | = | १ काष्ठा । |
| १५ काष्ठा | = | १ लघु । |
| १५ लघूनि | = | १ नाडिका । |
| २ नाडिका | = | १ मुहूर्तः । |
| ६ व ७ मुहूर्तः | = | १ प्रहरः । |

दिनमानस्य ह्रास-वृद्धि वशतः षड् वा सप्त वा मुहूर्ताः प्रहरे संभवितुमर्हन्ति । अग्र सर्वमपि विष्णुपुराणावद् वर्तते । युगमानस्य वर्णनं नारदपुराणे पि वर्तते । मार्कण्डेय पुराणस्य कालमान परिभाषा विष्णुपुराण सदृशश्चैव विद्यते । ब्रह्मवैवर्ते, लिंगपुराणे पि विष्णुपुराणेन साम्यमस्ति । ब्रह्मणोमासे यानि त्रिंशद दिनानि भवन्ति । तेषामत्र पृथक् पृथक् नामानि विद्यन्ते । वामन पुराणे कालमानस्य काचिद् सूचीनैव वर्तते । कूर्मपुराणे निमेषादारभ्य ब्रह्मायुः पर्यन्तं कालस्य वर्णनं विद्यते । अत्र विष्णुपुराणता काचिद्विशेषता नास्ति । मत्स्यपुराणे विष्णु - पुराणसदृशमेव कालमानमस्ति । गरुड़ पुराणे कालमान विषयकं वर्णनं कुत्रापि- नोपलभ्यते । ब्रह्माण्ड पुराणे विभिन्नकालभागानामुल्लेखमात्रं विद्यते ।

लवाःकाष्ठाः कलाश्चैव मुहूर्तान् सन्धिरात्र्यहान् ।
अर्द्धमासांश्च मासाश्च अयनाब्दान् युगानि च ।।
+ + +
कृतं त्रेता द्वापरं च तिष्यंचैव तथा युगम् ।।[३१]

पुराणे विविध यन्त्रानामप्युल्लेखो दृश्यते । श्रीमद् भागवतस्य तृतीये ध्याये घटीयन्त्रस्य वर्णनमपि समुपलभ्यते ।

द्वादशार्द्धं पलोन्मानं चतुर्भिश्चतुरंगुलैः ।
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थ जलप्लुतम् ।।[32]

एतदनुसारमिदं ज्ञायते यदेकमेतादृशं पात्रं निर्मीयते यस्य भारमानं षटपलानि भवति । तत्पात्रं चतुरस्राकार परितश्चतुरः गुलोच्चिं च भवति । पात्रस्यधस्तात् माषा परिमित स्वर्णस्याकार तुल्यं छिद्रमेकं क्रियते । पात्रमेतादृशं विस्तृतं भवति यत्र प्रस्थमात्रमेव जलं तिष्ठेत । एवमिदं पात्रं जले निःक्षिप्तं सद्यावताकालेन पूर्यते स घटीपदेनाभिधीयते । एवं घटपूरणाभि व्यंगत्वात् कालो पि घटी पद वाच्यः संजातः । घटी यन्त्रस्य वर्णनं ब्रह्मवैवर्त पुराणे पि समुपलभ्यते । एतदपि वर्णनं श्रीमदभागवतीयवर्णनवदेव विद्यते । यन्त्रमिदं केनाविष्कृतमिति विषये तत्र नैव किंचिद् विद्यते प्रमाणम् । ब्रह्मवैवर्त पुराणस्य घटी यन्त्र विषयकं वर्णनमिद मस्ति । —

यथाश्रुतं शम्भुवक्त्रात् कालमानं निशामय ।
पात्रं षट्पल संभूतं गभीरं चतुरंगुलम् ।।
स्वर्णमाषकृतच्छिद्रं दण्डैश्च चतुरंगुलैः ।
यावज्जलप्लुतं पात्रं तत्कालं दण्डमेव च ।।[33]

विष्णुधर्मोत्तरीय वर्णनानुसारं कालोम नादि निधनो विद्यते । स एव रुद्रः संकर्षणश्चेति कथ्यते । सर्वभूतेषु तस्य समान एव प्रभावो भवति । तेन स रुद्रः कथ्यते । यस्मात्स अनादिनिधनो वर्तते, तस्मात्स महान् परमेश्वरो विद्यते । सूर्यस्य गति विषये पुराणेषु स्वतन्त्रा मान्यता स्ति । तदनुसारं सूर्यस्यैकोरथो विद्यते, येनाकाशे तस्य गतिर्जायते । तस्य रथस्य स्वरूपं सर्वेष्वपि पुराणेषु ~~मन्न~~ समानमेव

वर्णितमस्ति । केवलं मत्स्यपुराणे किंचिदेव भिन्नता लोचनपथमवतरति । विष्णुपुराणे रथवर्णनं यादृशं वर्तते तदनुरूपमेव प्राय: सर्वत्र समुपलभ्यते ।[34] एवं पुराण मते सूर्य रथ एकचक्रात्मको विद्यते । यत्र संवत्सरेणैकेन सूर्यस्य भ्रमणं पूर्यते । तेन संवत्सरचक्रमेव सूर्यरथ चक्रं मन्यते । यच्च कालचक्रमपि कथ्यते । अत्र कालोगतिश्चैकस्मिन्नेव चक्रे स्वीकृते स्त: ।

ज्योतिष विषयकं वर्णनं प्राय: सर्वेष्वपि पुराणेषु संप्राप्यते । नारद-विष्णु-अग्नि धर्मोत्तर पुराणेषु प्राय: ज्योतिष विषयकं वर्णनं विशदमथ चान्य पुराणापेक्षया विकसितमस्ति । नारद पुराणे प्रायश: सूर्यसिद्धान्तस्यैव श्लोका: समुपलभ्यन्ते । अग्नि पुराणे स्वतन्त्रा एव श्लोका विद्यन्ते । विष्णु धर्मोत्तरे पृथक् रूपेणैक: सिद्धान्त एव वर्तते । य: पितामह सिद्धान्तो निगद्यते । आधुनिक सिद्धान्तस्य मूल स्वरूपं पितामह सिद्धान्ते संप्राप्यते । अतएव ब्रह्मगुप्त-भास्करादय पितामह सिद्धान्तमेवागमं स्वीकृत्य स्व स्व ग्रन्थान् रचयामास । भारतीय सिद्धान्त ज्योतिषे मुख्यतया पक्षत्रयं वर्तते । सौरपक्ष- ब्राह्मणपक्ष- आर्य पक्षश्च । सौर-पक्षस्य मुख्यो ग्रन्थ: सूर्य सिद्धान्तो विद्यते । सूर्य सिद्धान्तस्य बहव: श्लोका: नारदपुराणे पि दृश्यन्ते । विष्णु धर्मोत्तर पुराणे ज्योतिष विषयकं वर्णनं नारद पुराणतो विकसितं स्वरूपमवलोक्यते । ज्योतिषां निरीक्षण-परीक्षण विधीनां वर्णनं लिंग पुराणे पि संदृश्यते । तदनुसारं ज्योतिषस्य गतागतानां घटना, परीक्षणं मनुष्येन स्वमास चक्षुषा गमादनुमानात् प्रत्यक्षादुत्पत्तिश्च कार्या । एवं ज्योतिषविषयाणां निर्णयार्थं ब्रह्माण्डपुराणेप्येतेषां हेतुनापुल्लेखो दृश्यते । एवमेतेषामवलोकनेन निश्चीयते यत्पुराणानां ज्योतिष विषये महत्वपूर्णं स्थानं वर्तते । नारद पुराणे ज्योतिषस्य विशालता विषये एतादृश उल्लेख: समुपलभ्यते । येन पुराण ज्योतिष वाङ्मयमतीव विशालमासीदिति लक्ष्यते । तदनुसारं ज्योतिषस्य शाखात्रयं वर्तते ।

त्रिस्कन्धं ज्यौतिषं शास्त्रं
चतुर्लक्षं मुद्राहृतम् ।
गणितं जातकं विप्र
संहिता स्कन्ध संज्ञिता ।।[३५]

पुराणकाले ज्योतिषां परीक्षणं समुन्नत रूपेण भवति स्म। तत्र द्वादशराशिनां चर्चा शतशो विद्यते । विष्णु धर्मोत्तरे नक्षत्राणां तारासंख्याया: सूची संप्राप्यते। परं सम्प्रति नक्षत्रेषु यास्तारा संख्या मन्यन्ते ताभि: सहास्या: साम्यं नैव दृश्यते। तत्र नक्षत्राणां प्रकाशवर्णानामप्युल्लेखो विद्यते । येन तत्कालीनं निरीक्षण पाटवं प्रमाणित जायते । --

| नक्षत्राणि | तारासंख्या | वर्णा: |
|---|---|---|
| अश्विनी | २ | विचित्र: |
| भरणी | ३ | कृष्ण: |
| कृत्तिका | ६ | रक्त: |
| रोहिणी | ३ | श्वेत: |
| मृगशीर्ष: | ३ | श्वेत: |
| आर्द्रा: | १ | श्वेत: |
| पुनर्वसु | २ | श्वेत: |
| पुष्य: | १ | पीत: |
| आश्लेषा | ६ | श्वेत: |
| मघा | ६ | श्वेत: |
| पूर्वा फाल्गुनी | २ | रक्त: |
| उत्तरा फाल्गुनी | २ | रक्त: |
| हस्त | ५ | रक्त: |
| चित्रा | १ | विचित्र: |
| स्वाती | १ | श्वेत: |
| विशाखा | २ | पीतरक्त: |
| अनुराधा | ४ | रक्त: |
| ज्येष्ठा | ३ | पीत: |

| नक्षत्राणि | तारासंख्या | वर्णाः |
|---|---|---|
| मूलम् | २ | कृष्णः |
| पूर्वाषाढा | ४ | श्वेतः |
| उत्तराषाढा | ४ | विचित्रः |
| अभिजित् | ५ | पीतः |
| श्रवण | ३ | पलाशः |
| धनिष्ठा | ५ | पीतः |
| शतभिषा | १०० | श्वेतः |
| पूर्वा भाद्रपदा | २ | श्वेतः |
| उत्तरा भाद्रपदा | २ | श्वेतः |
| रेवती | १ | रक्तः |

विष्णुधर्मोत्तरे ध्रुवस्थान सन्निधौ चतुर्दश नक्षत्राणामुल्लेखो दृश्यते । ते च नामत उत्तानपादे यज्ञो धर्मो नारायणः साध्यावश्विनौ वरुण, अर्यमा, संवत्सरो, मित्रो ग्निर्महेन्द्रो मारीचः, कश्यपः ध्रुवश्चेति चतुर्दश विद्यन्ते । तत्रैतेषां नक्षत्राणां शिशुमारस्यांगेषु निवेषः कल्पितो वलोक्यते । सप्तर्षीणां ज्ञानं वेदकाल एव संजातमासीदिति पूर्वमेव प्रतिपादितम् । उपर्युक्त नक्षत्रेषु पौराणिक व्यक्तीनां नामानि समागतानि सन्ति । प्रायस्तेषां स्मारक रूपेण तेषामेव नामसु नक्षत्राणां नामानि महापुरुषाणामेव नामानि निर्धारितानि दृश्यन्ते । मुख्यतो ग्रीक देवतानां नामानि तत्र विद्यन्ते । सप्तवाराणामुल्लेखः पुराणेषु बहुशो दृश्यते । तत्र ब्रह्माण्ड पुराणे नक्षत्राणां श्रविष्ठादिगणनाया उल्लेखो विद्यते । सर्वेषां ग्रहाणां नक्षत्राणां च प्रात्यादिक भ्रमणं ध्रुव केन्द्रिक प्रवहवायु वशेन

धूमकेन्द्रिकाहोरात्रवृत्ते संजायत इति लिंगपुराणे समुल्लिखितं दृश्यते ।

अथ चायना-मिश्र-बेबिलोनिया देशेषु
ज्यौतिष-खगोल शास्त्रस्य व्याप्तिः ।।

प्राचीनकाले पाश्चात्यदेशेष्वपि खगोलशास्त्रस्य सम्यक् रूपेण प्रचारः प्रसार आसीदिति पाश्चात्य खगोलशास्त्रमवलोकनेन ज्ञायते । चीन देशे ख्रीस्ताब्दात् पूर्वं २३०० संवत्सरे 'यावो ' नामकः कश्चिद् विद्वानासीत्, तेन 'षूकिंगो ' नामके प्राचीने ग्रन्थे व्यलिखत् तदानीन्तनैकाले विषुवद् विन्दु स्थितिरयन बिन्दु स्थितिश्च तद्देशीयैः पण्डितैः यद् यद् ~~तत्त्वं~~ ज्ञातं तद् तद् प्रतिपादितम् । तत्रैव ग्रन्थे द्वौ पण्डितौ 'षी' 'हो ' नामकौ रविग्रहणाकालिक कृत्याकरण दोष कृते राज्ञो मरण दण्डनविधौर्विषयी भूताविति च प्रतिपादितम् । 'मीटिन' नामकः विद्वान् तिपुरानावृक्तिकालो यो त्र ग्रन्थे -व्याख्यातवन्तः स कालो चैनशास्त्र ज्ञानमपि ज्ञात एवेति द्योत्यते । गोलयन्त्रम् घटीयन्त्रम् चक्रयन्त्रमित्यादिकानि प्राचीने भारते यन्त्राण्युपयुक्तानि तानि एतत्रापि वर्णितानि दृश्यन्ते । ख्रीस्ताब्दात् पूर्वमेकादशशततमे वर्षे एव परम क्रान्तिं 'चैकंग ' नामकैः पण्डितैः कृतमिति वर्णितम् दृश्यते । धूमकेतूनामागतानां कालाः तत्र ग्रन्थे लिखिताः । १२८० ख्रीस्ताब्दे 'कुब्लेखान' नामकेन पण्डितेन राजस्य पट्टाभिषेक समये द्वौ यन्त्रौ निर्मितौ ते पेकिंग पट्टने यावधि पर्यन्तं दृश्यते । मिश्र(इजिप्त) देशे पि प्राचीन एव काले वर्षस्य प्रमाणं नक्षत्राणामुदयास्त कालाश्च मतविषयक कर्माचरणार्थं विज्ञापितं दृश्यते । खगोलशास्त्रिभिस्तत्र नक्षत्राणां गतिरनुसृत्य 'पीरामीडस' नामकानि गोपुराणि निर्मितानि । बेबिलोन देशे ख्रीस्ताब्दात् पूर्वं त्रिसहस्रवर्षेभ्यः प्रागेव खगोल शास्त्रं

विस्तारमवाप्तम् । एतदेव शास्त्रं 'ग्रीस देशं' प्रतिजगामेति पाश्चात्य पण्डिता: मन्यन्ते । तत्र 'षाल्डिया' देशान्तभागे 'सारोस' नामक ग्रहण पुनरावृत्ति कालो ष्टादश वर्षात्मको विज्ञात, इत्यत्र ग्रन्थे न्यत्र व्याख्यातमस्ति । ख्रीस्ताब्दो ३८०० वर्षे पि 'सागोंस' नामकस्य राज्ञ: काले खगोलशास्त्रस्य ज्ञानमासीदिति ग्रन्थे वर्णितं दृश्यते । नक्षत्र राशीनां मेषादि नामान्यपि तत्र वर्णितानि दृश्यन्ते । बुधादि ग्रहाणां स्थान पुनरावृत्तिकालो पि तेर्गणित: । वर्षस्य प्रमाणं सूर्य सिद्धान्त वर्ष प्रमाणमिव सार्धचतुष्कलामिति कालेनाधिकतया गृहीतम् । अमावस्या पूर्णिमाकालो ग्रहणकाला इत्यादिका: ये ये पंचांग विषय: वर्तन्ते ते ते तत्र गृहीतम् । अथ 'पार्कस' नामको ग्रीस देशीय शास्त्रज्ञो स्मादेवं देशात् शास्त्रमभ्यतवमिति अनुमीयते । (ग्रीसि) बेबिलोन देशे कश्चिद् कृषि: ख्रीस्ताब्दो पूर्वं ६४० तमे वर्षे 'कौस' नामक देशे खगोलशास्त्रस्य पाठशालामुपस्थापितवान् । तस्य शिष्या: देश-प्रदेश-देशांतरं गत्वा शास्त्रं विस्तारयामास । ख्रीस्ताब्दे पूर्वं ५८५ तमे वर्षे रविग्रहणमासीदिति तेर्निरूपितं दृश्यते । 'सारोस' नामक कालज्ञानं तेषामासीदित्यवगम्यते । 'थेल्स' नामक: शिष्यस्तस्य ग्रीस देशीय शास्त्रं स्वदेशे नीतवान् । 'पायथागोरस' नामके: पण्डितै: इजिप्त देशं तदनुप्राग्देशं च गत्वा औदयिक सामयिक नक्षत्राणि परमक्रान्तिं भूमेर्गोलत्वंच विदितवान् । तस्य प्लेटो शिष्य: अरक शार्कि नामको रविर्भूमियं परितो गच्छतीति बुध शुक्रो रवि परितो गच्छत इति मेने । 'पायथागोरस' एव नीचोच्चवृत्तमार्गं प्रतिपादितवानित्यनुमीयते । किन्तु तस्या: भंगया: सम्पूर्ण प्रतिदानं 'एपोलोनियस' पण्डितेन कृतम् । ख्रीस्ताब्दात् पूर्वकं यास्क नामक: पण्डित: नक्षत्राण्यधिकृत्य द्वौ ग्रन्थौ विरचितवान् । एलेग्जेण्डिया पाठशालेति काचिद् संस्था ग्रीकदेशे आसीत् । तत्र तेरिस्टूटलस्-टिमोकारीस् नामकौ पण्डितौ नक्षत्राणां 'क्रान्ति' संप्रेदयु: तेनायनगतिस्ताभ्यामाविष्कृतमिति अवगम्यते ।

१६८८ तमे ख्रीस्ताब्दे जानवलिस शास्त्रज्ञः 'अरिस्टारस' नामक रविचन्द्र गणितं मुद्रापयामास । तद् ग्रन्थ रचनाकालः ख्रीस्ताब्दात् पूर्वं २७० इत्यासीत् । तस्मिन् ग्रन्थे र्द्धं प्रकाशमाने चन्द्रबिम्बे त्वर्केन्दुं पुरस्कृत्य रविचन्द्रयोर्द्दूरं निष्पचि निर्णयः शक्यत इति कथितम् । किन्तु गणितं कृत्वा 'अरिस्टार्कस्' रवेर्दूरं चन्द्रीयाद्विंशती गुणमेवेति निर्णयं चकार । 'इराटोस्थेनीस' नामक पण्डितः 'एलेग्जेन्ड्रीया ' ग्रन्थालयाध्यक्षो भूत्वा तन्त्रः गोलयन्त्र निर्माण पद्धतिं (२७६-१९६ ख्रीस्ताब्दात् पूर्वं ) विस्तारयामास । परम क्रान्तिं २३°-५१' इति प्रतिपादितवान् । भूमेः परिधिं सूक्ष्मं निर्णयामास । अथ ग्रीसदेशीयः पण्डितानां मध्ये रविचन्द्राविव द्वावप्रकाशताम् । तौ 'हिपार्कस्' 'टौलमी' इत्याख्यातौ । हिपार्कस् पण्डितो ग्रहभगणकालानारभ्य विषुवद्गति पर्यन्तं यावद् गणित ग्रन्थं स्पष्टतया क्रीडी चकार । त्रिकोणमिति सृष्ट्वा गणिते सौलभ्यं संपादयामास । किन्तु तस्य विषुवद् गतिः ३६' विकलात्मिका स्थूला, तस्य कालः ख्रीस्ताब्दात् पूर्वं १३० वर्षमितः । इदं यावत् 'टालेमी' पण्डितस्यात्मजे 'स्टु' नामके ग्रन्थे प्रचुरितम् । 'हिपार्कस ' महोदयस्य कृषिः 'टालेमी ' ग्रन्थ रचनया सम्पूर्णा शाश्वती चाभवत् । एलेजेन्ड्रिया विद्याशालायाः 'टालेमी' अन्त्यो गुरुरित्युच्यते । तस्यानन्तरं तस्य शिष्य एव व्याख्यातारः । न कश्चित् ग्रन्थकर्ता ततः परम भवत ।

कश्चित् ओमर् नामक स्तुरुष्क प्रभुः ख्रीस्तस्य ६४१ वर्षे लेग्जान्ड्रीया नगरमजयत् । ततः परं सार्धैकशतवर्षादनन्तरं 'आल्मेस्टु ' ग्रन्थो यं अरबीभाषाया-मनुवादितः 'कालिफ ' नामके पुरुषैर्बग्दाद नगरे ८२९ तमे संवत्सरे वेधशालां निर्मितवान् । अत्र 'आल्बामजार' नामकः होराशास्त्रग्रन्थं रचयामास । अरबियादेशीय खगोल विज्ञानं स्पेनदेशं प्रति व्याप्तम् । लीडेन विश्वविद्यालये वेधशालायां आचार्य

पदवी मलंकुर्वाणो 'गोलियस' नामक: कश्चिद् अरबीभाषायां पाण्डित्यं समुपार्ज्य तदानीन्तने काले अरबीया देशे वर्विर्धमानं खगोलशास्त्रं गणितशास्त्रंच स्वदेशे विस्तारयितुं युज्यते । इति ते शास्त्रे अरबीभाषायामेव अभ्यासयोगे ति प्रचारमकरोत् । वयमथ भारतीया यथा गणितमांगल भाषायामभ्यस्यन्त: शास्त्रथिय अध्येयतुमांगल-भाषायामेव युज्यत इति । किन्तु 'गोलियस' पण्डितस्य वयो देशभाषा भवतेस्त-त्रत्यैनाहृतम् । सत्वरमेव पाश्चात्य देशेष्वरेबियादेशादुगतं: ग्रहनक्षत्रपदकै: सर्वत्र व्याप्तमभूत । वियेन्ना नगरे १४५० संवत्सरे 'पर्वाक्' पण्डित: 'इविन जानिस' इत्स्य 'बग्दाद' गोलज्ञान पण्डितस्य इजिप्त निवासिन: पदकान्त्यनुसृत्यो पन्यस्यति स्म । अत्रान्तरे इटलीदेशे रविकेन्द्रिक सिद्धान्त: पुरस्कृत: 'कोपर्निकस्' पण्डित: १५४३ ख्रीस्ताब्दे रविकेन्द्रकग्रहभ्रमण सिद्धान्तेन भूमेरात्मभ्रमण सिद्धान्तेन च वकृत्वादि विषयान् सरसमुपपाद्य विरचितवान् । किन्तु तात्कालिकमत गुरुणां तस्य वादस्य प्रतिबद्धत्वात् चिरकालेनैव आदरपात्रत्वमभूत् । अथ 'टिकोब्राहीति' कश्चिद् पण्डित: कासेल नगर वेधशालायां ग्रहणक्षत्रवेधं महत्या कार्यं दीक्षाया चकार । तस्य वेधांकान् पुरस्कृत्य तस्य शिष्य: 'कैप्लरो' ग्रहगतिसूत्रं व्यरचयत् । अदमेव नवीन सिद्धान्त शास्त्रस्य मूलपुरुष: । अत्रान्तरे 'गैलेलीयो' नामक: पण्डितो भूमेराकर्षण-मस्तीति निर्णीतिम् । दूरवीक्षणयन्त्रं विरचय्य ग्रहनक्षत्राणि स्पष्टतया ददर्श । १६३८ ख्रीस्ताब्दे 'प्रश्नशास्त्राणि' इति नामकं कश्चिद् ग्रन्थं व्यरचयत् । अथाकर्षण सिद्धान्तस्य मूलप्रवक्ता आजन्म ब्रह्मचारी यावज्जीव सारस्वतोपासको 'न्यूटन' स्वयं कलित चलनकलन सिद्धान्तेन नवीन खगोलीयशास्त्रं चकार । अथ क्रमेण गतिशास्त्रस्य निरन्तरं विकासमारभत । तरंगशक्तिशास्त्रमिति, परमाणुशक्तिशास्त्रमिति शाब्द ज्योतिषशास्त्रमिति, वर्णपट शास्त्रमिति अनेकानि नूतन शास्त्राणि सृष्टि: रहस्यानि प्रदर्शयन्ति ।

## ।। ग्रहस्वरूपनिरूपणम् ।।

ज्यौतिषशास्त्रे ग्रहाणामेव महत्त्वपूर्णं स्थानमस्ति । ग्रहाणां गत्यादिकस्य ज्ञानमेव ज्यौतिष शास्त्रम् । तदधिकृत्यैव होराशास्त्रे ग्रहाणां स्वरूपाधिकस्य ज्ञानं वर्णितम् वर्तते । यदधिकृत्य फलकथनं भवति । बृहत्पाराशरे होराशास्त्रे प्रथमाध्याय-यादारभ्य ग्रहचर्चा कृता दृश्यते । यत्र च ग्रहण निरूपणाध्याये पूर्व भागश्च प्रथम - द्वितीय-षष्ठ-सप्तम चतुस्त्रिंशध्यायानुत्तर भागस्य च द्वितीय तृतीय नवमाध्यायानां विचारो विहित: प्रथमाध्याये भगवत: परमात्मनो ये वतारा: शास्त्रेषु कथिता:, ते पि सूर्यादि ग्रहाणामेव अवतारा बोध्या: यतोहि ग्रहा अपि परमात्मन एवांशा इति प्रतिपादितम् । ग्रहणाति गति विशेषानिति यद्वा गृहणाति फलदायत्वेन जीवानित्यर्थे विभाषा ग्रह: ।[36] वेदे पि यद् गृहणाति तस्माद् ग्रह: निर्दिष्टम् ।[37] आकाशस्थले ज्योतिबिम्बान्यनन्त संख्यकानि दृश्यन्ते । सर्वाणि तानि स्थिर स्थानानि नक्षत्राणीति कथ्यन्ते । ग्रहास्तु पूर्वाभिमुखं गच्छन्ति, तानि नक्षणात्रि सततं ग्रहणान्ति । अत एवैते ग्रहा अपि प्रोच्यन्ते ।[38] ग्रहाणामपि प्रकाशका प्रकाशक रूपेण भेदद्वयं पराशरेणांकितम् । ग्रहाणां नवसंख्या महाभारते दृश्यते । अस्मिन् हि गन्थे नवग्रहानामधिकृत्य नवावतारा: प्रतिपादिता: । यत्र ग्रहाणां सप्तसंख्या प्रोक्ता तत्र राहु केतु विहाय बोध्या । होराशास्त्रे फलकथनार्थं ग्रहाणां वर्णलिंगादि ज्ञानमावश्यकमतो त्र निरूप्यते ।

सूर्यः

सरति आकाशे सुवति कर्मणि लोकं प्रेरयति वा इति सूर्यः । वेदे पि 'एष वै ग्रहः य एष तपति, येनेमाः प्रजाः गृहीताः ।'[38] इत्युपलभ्यते । अयं सूर्यः कालपुरुषस्यात्मा, विश्वस्य राजा, रक्त तश्यामवर्णः अग्निदेवताकः, पुलिंगः, क्षत्रियवर्णः सत्वप्रकृतिको मधुपिंगल नेत्रः चतुरस्रशरीरः, शुचिः पित्त स्वभावः, धीमान्, अल्पकेशः, अस्थि स्वामी, देवालयाधिपः, रामये यनाधिपतिः, कटुरसः दक्षिणादिशि, दिवसे च बलवान् स्थूलवृक्षोत्पादकः, रक्तलोम वस्त्रः, ग्रीष्म-ऋतुस्वामी, मूलसंज्ञक सिंहशस्याधिपतिः, मेषराशेर्दशांश पर्यन्तमुच्चः, तुलाराशेश्च दशांशान्तं नीचः, सिंहराशेर्विंशत्यंश पर्यन्तं मूलत्रिकोणसंज्ञकः, चन्द्र मंगल गुरवोऽस्य मित्राणि, बुधः समः, शनि शुक्रौ च शत्रू । राज्य, विद्रुम, रक्त-वस्त्र, माणिक्य, राज वर्णं पर्वत चैत्र पितृ पतिव्रता स्त्री प्रभृति वस्तूनां कारकः द्वाविंशे वर्षे भाग्योदय प्रदश्च ।

प्रोक्तः - भगवान श्रीराम सूर्यो स्यावताः । सूर्यो यमेकं नक्षत्रं नक्षत्रेभ्यः समीपतर स्थलात् पृथुलबिम्बवान् अस्माभिर्दृश्यते । भूमेस्तस्य दूरं ६३००००० खषट्काग्नि गोमितामैल्यः । गौलीय दूरेष्विदमतीव लघ्विति वक्तव्यम् । क्रान्तिवर्षपूर्वं निरूक्तमस्माभिः । विकलामितस्य कालस्य १८६००० खरावसुभूमित-सङ्ख्यमैली गैगाया क्रान्तिः । सा वर्षमध्ये यावन्त मध्वानमति क्रामति । तावद् एवं क्रान्तिवर्षमिति परिभाषा । वस्त्वष्टबाणसहस्र कोटि मैलीमितं भवति ।

( ५८८ + १० $^{१०}$ ) अस्माकं समीपतम नक्षत्रबन्धुः शतभिषगिति यस्य दूरं ४$\frac{१}{३}$ क्रान्तिवर्षाणि । अनेनोपमितं रविदूरमत्यन्तल्पमेव भवति । ततस्तस्य बिम्बाधिक्यम् खगोलीय व्यासः ८६४००० मैलीमितः । अर्थं रवि बुध शुक्रादीन् ग्रहान् शक्त्याकर्षणात्मानं प्रदक्षिणीं करोति । बहुसंख्याकान् महागोलानेवं महावेगैः परिभ्रामयितुस्तस्य महती शक्ति ब्राह्मणो धारणात्मिका शक्ति ज्ञापयति ।

<u>चन्द्र :</u>

भूमेरत्यन्तं सन्निहितः खगोलीय बन्धुश्चन्द्रः । कुवलय बन्धुरिति पूर्वेषाश्चा-मुमर्थं गमयति । तस्य गोलीय व्यासार्धमशीत्यधिक सहस्रमित (१०८०) मैल्यो भवन्ति । भूमेदूरं च २४००० मैल्यः । बिम्बीय व्यासस्य विकीर्णं तस्य कक्षायाः दीर्घवृत्तस्य च्युति निर्णेतुं शक्या भवति । सा च $\frac{१}{१६}$ भवति । चन्द्रस्य भुवं परितो भगणाकालः २७$\frac{१}{३}$ मितानि दिनानि, चन्द्रमार्गो नक्षत्रेषु बृहद्वृत्तं भवति । तस्य क्रान्ति वृत्तस्य किञ्चित् तिरश्चीनम् । अस्य विक्षेप वृत्तस्य क्रान्तिवृत्तस्य संपात विन्दू राहुकेतौ। यदा रवि चन्द्रयोर्योगो भवति, तदा अमावस्या, यदा तयोरभिमुख्यं भवति, त्यर्केन्दु राशिषट्कं भवति तथा पूर्णिमा । ज्योश्चमावस्ययोर्वा ज्योर्पूर्णिमयोर्वा मध्ये चः कालः स चान्द्रमासः इतीरितः । असौ असौ मासश्चन्द्रभगण कालाद् भिद्यते । भगणकालो नाक्षत्रमास इत्युच्यते । दूरदर्शने विलोकिते चन्द्रे बहवः पर्वता दृश्यन्ते । येषामुन्नत्यादि विषयाः सर्वे गणिताः सन्ति । चन्द्रोहि कालपुरुषस्यमनो, गौरगात्रो जलदेवताकोवश्यः, स्त्रीलिंगः, सत्वस्वभावो, बहुवातकफः, प्राज्ञः,

शरीरे रक्ताधिपतिः, जलस्थानस्वामी, समयैमुहूर्ताधिपः, लवणरसः उत्तरदिशि अग्निकोणश्चवा, निशायां च बलवान्, दुग्धफलोत्पादको, वर्षाऋतुस्वामी, वामिस्त्री, धातुसंज्ञकः, कर्कराश्याधिपतिः, वृषराशेरंशत्रयान्तमुच्चो, वृश्चिक-राशेस्त्रयांशत्रय पर्यन्तं नीचस्तथा, वृषराशेस्त्रिंशदंशान्तं मूलत्रिकोण संज्ञकश्चास्ति, सूर्यबुधावस्ये मित्रे, मंगल-गुरु-शनि शुक्राश्च समाः सन्ति । अयं पुनर्मातुमनः , पुष्टिगंधरसेनुगौक्षदारक, द्विजशक्ति कार्यस्य रजत विवाह प्रभृतिकानां वस्तूनां कारकः, चतुर्विंशाब्दे च भाग्योदयप्रदो भवति । भगवान् श्रीकृष्णोह्यस्यावतारः । कदाचिच्चन्द्र गोलो ग्नि पर्वतव्याप्त इति सम्प्रति तेग्निशून्या भस्मीभूता इत्यनुमितम् । तत्रानुमाने कारणं पर्वतानां प्रायशः शिखरशून्यत्वम् । चन्द्रगोलस्य वातावरण शून्यत्वादुल्का निरन्तरमिमं गोलं प्रविश्य शिखराणि भेदयन्तिति केषाश्चिद् मतम् । चन्द्रस्य वातावरणं नास्तीति वक्तुं हेतुर्मस्थतया नक्षत्रस्य चन्द्रतिरोधान समये हठाद् दृश्यत्वम् । यदि वातावरणं विद्यते । नक्षत्रं क्रमशः कान्तिहीनं भूत्वा दृश्यत्वं प्रतिपद्येत । चन्द्रगोले रवियंत्रबिन्दौ स्वस्तिके वर्तते, तत्र शताधिक भाग उष्णो भवतीति सिद्धान्तितम् । दिवाभागेऽत्युष्णं, रात्रौयावतिशीतलं पुरस्कृत्य चन्द्रगोले शिलातलमोदकं नास्तीति । रविग्रहण समये चन्द्रगोले रवि इव स्वस्तिक स्थाने त्युष्णं शतभागेभ्यः ९७ भाग पर्यन्तं क्षीयत इति निर्धारणेनोपर्युक्त मनुमानं निश्चय ज्ञानं ददाति । फलितो थं चन्द्रगोले नास्ति वायु जलमपि नास्ति । जलवायू नास्माकं प्राणदातारौ, किन्तु प्रतिक्षणं पतिनीभ्य उल्काभ्यो स्मान संरक्षयात्युष्ण शीतबाधामपि परिहरत इति च ज्ञायते ।

:: मंगल ग्रहः ।

मंगलग्रहो यं कालपुरुषस्य सत्वम् । रक्तवर्णः, कार्तिकेय देवताकः, ग्रहसेनापतिः, क्षत्रियः, तमः स्वभावः, क्रूरोरक्तनेत्रश्चंचलः, पित्तप्राकृतिकः, क्रोधी, कृशी, मध्यदेहश्च, उदारहृदयः, अग्निस्थानस्वामी, समये हौरात्राधिपः, तिक्त रसः, दक्षिणो रात्रौ च बलवान्, कटुवृक्षोत्पादकः, रक्त तवस्त्रः, ग्रीष्मऋतुस्वामी, मेष, वृश्चिकराश्याधिपतिः, मकर राशेरष्टाविंशत्यंशान्तमुच्चो तथा कर्कराशेष्टाविंशत्यंश पर्यन्तं नीचो मेषराशौ द्वादशांशान्तं मूलत्रिकोण संज्ञकश्चास्ति । अस्य हि रवि चन्द्र गुरवो मित्राणि, शनि शुक्रौ समौ, बुधश्च शत्रुः । अग्नि तत्वः, धातु संज्ञकश्चायं, सत्वभूमि पुत्रः, शीलवान्, शौर्यवान्, रागी, बलः, भ्रातृपराक्रमी, अग्नितत्वः, साहस, राज- शत्रु, ~~कुलटास्त्री~~ कुलटास्त्री, प्रभृतीनां वस्तूनां कारकः, अष्टाविंशति तमे वर्षे भाग्यप्रदो भवति । भगवान् नृसिंहस्यावतारः । रवेर्भूमिश्च मध्यगतौ बुधशुक्रावदस्य ग्रहाविति भणामः । कुजादये गुरुग्रहाश्चेति । तत्र कुजो भूमेः समीपस्थो गुरुग्रहः । तस्य गोलीय व्यासः ४२०० मैल्यः । ततः स भूमेरल्पो भवति । तद्गोलीय द्रव्यं भूद्रव्ये दशांश एव भवति । तस्य कर्णः पूरमितः, रविं परितो भगणकालः ६८७ दिनानि, रवियोग कालः ७८० दिनानि चा तस्य परमविक्षेपः $2^{0}$ केन्द्रयुतिः ०.०९३१ । रवेराभिमुख्ये कुजो भूमेराति समीपमागच्छति । तद तस्य प्रकाशः पंचविंशति गुणो भवति । केन्द्रच्युतेरधिकत्वात् यदा भूमेरंगारक कक्षायां यो रवेरत्यन्त समीप बिन्दुस्तस्य समीपे यदा भवति तथा भूकुजयोर्मध्यदूरम् ३.४६ कोटिमैलीमितं भवति । इदं

तपोर्मध्ये परमाल्पद्दूरम् । भूमेः पंचदश भगणकालः कुजस्याष्ट भगणकालसमः । तस्मात् प्रतिपंचदशवर्षं सिंह गते रवौ कुजः कुंभराशितः शीघ्र बिन्दौ भवति । ततो रवेराभिमुख्यं भजति । ततश्च भूमेरत्यन्तं सन्निहितो भवति । तस्मिन् समये रविलम्बनं सूक्ष्मतया वेधनीयं भवति । १८७७ क्रीस्ताब्दे तादृश सन्दर्भे कुजस्य द्वावुपग्रहौ विद्येते इति ज्ञातम् । तयोश्चनाम्नि 'फोबोस्' 'डीमोस' इति चक्रुर्विज्ञाः । कुजस्यात्म भ्रमणकालः २४ होरा ३७ कलाः २३ विकलाश्च, तस्य च नाडी वृत्तीय व्यासः किंचिदेवाल्पीयमान् । उपग्रहयोर्दूरतरस्य कुजं परितो भगणकालः ३० होराः १८ कलाश्च । समीपतस्य भगणकालः ७ होराः ३९ कलाश्च । ततः प्रतिहोरं फोबोस नामक उपग्रहः प्राचीं ४७° भागानतिक्रमति । कुजस्य दैनन्दिन भ्रमणावशेन १५° भागान् प्रचीचीं गच्छति । दूरदर्शनेन समीक्षिते कुजगोलउत्तरार्द्ध गोले विस्तीर्णा गोधूमवर्णाः प्रदेशा दक्षिणार्द्धगोले नीलधूम्रवर्णाः प्रदेशा दृश्यन्ते । केचिद् दक्षिणार्द्धगोले समुद्र प्रदेशा इति मन्यते । नेदं सत्यं भवितुमर्हति । यदि समुद्र प्रकाशो भवति तर्हि रविप्रकाशोऽपि दृश्यते । केचन दृष्टारः कुजगोले चतुश्शतीमिताः प्रणाल्यो विद्यन्त इति ताः कृषि निमित्तं तत्रत्यैर्निर्मिताः कुल्या इति शशंकिरे । यथा यथा ध्रुवीय महिमा शिथिलो भवति तथा तथा कुल्याः सम्पूर्णं प्रवहन्तीति । इदं सन्देहास्पदम् । कुत्रे वातावरणमल्पीयसा उष्णताचाल्पीयसी । ततो हेतोस्तत्र मानुषाविद्यन्त इति वक्तुं न शक्यते ।

बुधः :

बुधस्तु कालपुरुषस्यवाणी, दुर्वाश्यामवर्णः, विष्णुदेवताकः, स्त्रीनपुंसक, वैश्यः । श्रेष्ठ शरीरः, श्लिष्ट वाक्यः, हास्यप्रियः, वात-पित्त-

कफदोषत्रययुत:, शरीरेत्वक्स्वामी, क्रीडास्थल स्वामी, मिश्रितरस:, पूर्वदिशि ईशानकोणश्च वा-अहोरात्रे बलवान्, निष्फल वृक्षोत्पादक:, कृष्णाक्षौवस्त्र:, शरद ऋतुप:, रज: स्वभाव:, मूलसंज्ञक: युवराजश्च कथित: । ज्योतिर्विद्यामातुल गणितकार्यनर्तनप्रिय:, वैद्यज्ञ:, शिल्पविद्याज्ञाता, विवाह वस्तुकानां प्रभृतिनां कारको, मिथुन-कन्या राशिपति:, कन्याराशि: पंचदशान्तमुच्चस्तथा, मीनराशि:, पंचदशांश पर्यन्तं नीच:, कन्याराशौ पंचदशांशनन्तरं विंशत्यंशान्तं मूल त्रिकोण:, मूलसंज्ञक: भूमितत्वश्चास्ति । अस्य हि रवि शुक्रौ मित्रे, शनि- गुरु-भौमा: समा:, चन्द्रश्च शत्रु: । चायं पुनद्वात्रिंशदतमे वर्षे भाग्यप्रद:, भगवान् बुद्धो स्यवतार: ।

रवेरत्यन्त सन्निहितो बुध: । तयोरमध्ये दूरं खरसाग्निलक्षमैथी मितम् । बुधो ग्रहेष्णु अल्पतम: । तस्य गोलीय व्यास: ३००० खाभ्रखाग्नि मैलीमित: । एवं चन्द्रगोलात् सार्धमधिके गोल: । प्रतिविकलं रसाग्नि ३६ मैलिमित वेगेन रविं परितो भ्रमति । अतो ग्रहाणां मध्ये महत्तमवेगावानिति तस्मात्तस्य `देवदूत' नामिति विद्यते । तदीय दीर्घ वृत्तस्य केन्द्रच्युति: ०२०६ तदीय: परमविक्षेपश्च ७ सप्तभागात्मक: । रविं परितो भगणकालो वस्वष्टमिता दिनान्यैव रवियोगकालस्तु ११६ रसभूचन्द्रमितानि दिनानि । तस्यात्म भ्रमणकालश्च भगण कालसमान एवेति शास्त्रज्ञो मन्यन्ते । ततो बुधो रवेश्चन्द्रो यथा भूमे: एकमेव गोलार्धं प्रकटयति । रवेस्तदीय परमदूरस्य परमाल्प प्रमाणं १८$^{0}$ परमप्रमाणं २८$^{0}$ । अयं व्यत्यास: केन्द्रच्युतिजन्य: । अतो बुध: सदा रविसमीपवर्ती प्रायश्चक्षुर्गोचरो न भवति । वसन्त काल: स सायमिक नक्षत्रतया गण्यते । तदा श् द्रष्टुं योग्यो भवति । शरत्काले चौदयिक नक्षत्रतया चक्षुर्गोचरो भवति । बहुप्रकाशे लुब्धक नक्षत्रमिवात्यप्रकाशे

रोहिणीव स प्रकाशते । तस्य वातावरणं विद्यते वा न वेति मीमांसन्ते विचक्षणाः। यदि विद्यते तदल्पमेव स्यात् । बुधो यदा रविबिम्बमाच्छादयति, तदा तस्य वेधेन बुध कक्षा मन्दोच्चस्य गतौ । प्रतिवर्षं मग्निवेदमित विकलाभेदो व गम्यते । असौ व्यत्यासः ।

## गुरु :

काल पुरुषस्य ज्ञानसुखात्मको, गौरगात्र, इन्द्रदेवताको मन्त्री, ब्राह्मणवर्णः, विशालदेहः, पिंगलकेशनेत्रः कफ प्रकृतिकः, धीमान्, सर्वशास्त्र-विशारदः शरीरेवसास्वामी कोशस्थानाधिपः, समये मासाधिपतिः, मधुररसः, पूर्वस्यां दिशि दिने च बलवान्, सफल वृक्षोत्पादकः, पीताम्बरः, धनुर्मीनस्वामी, कर्कस्य पंचांश पर्यन्त मुच्चस्तथा मकरस्य पंचांशान्तं नीचः, धनुषि च दशांशान्तं मूलत्रिकोणः, हेमन्त ऋतुस्वामी, सत्वस्वभावः, योगवाद? अध्यात्मवादी, आकाश-तत्वः । स्वकर्म यजन देव ब्राह्मण धन गृह कांचन वस्त्र पत्र मित्रान्दोलन विवाह प्रभृतिकानां वस्तूनां कारकः मूल संज्ञकश्चास्ति । अस्य हि रवि चन्द्र मंगल मित्राणि, शनिः समः, बुध शुक्रौ ~~रत्न~~ शत्रू । अयं पुनः षोडशेवर्षे भाग्योदयकारको भवति । भगवान वामनस्यावतारः प्रोक्तः ।

सर्वेषामपि ग्रहाणां गुरुतमो गुरुदेव । संस्कृत भाषायां कुज-गुरु-शनि नामानि सार्थकानि इति स्पष्टतम् । सर्वेषां ग्रहाणां द्रव्यमाहात्म्यं यावद् तावदधिक द्रव्यवान गुरुदेव । गुरुगोलस्य ध्रुवीय व्यासार्द्ध ४१४०० मैली मितं नाडीवृत्तिय व्यासार्द्ध ४४३५० मैलीमितम् । ततश्च गोलघनं त्रयोदश शतगुणो भूघनं भवति । गुणाकर्णः ५.२०३ भवति । तस्य केन्द्रच्युतिः ०४८१ । तस्य परमविक्षेप १°-२१' भगणकालः । ११८६ वर्षाणि रवियोगकालः ३९९ दिनानि ।

आत्मभ्रमणकाल: ६ होरा: ५५ कलाश्च । अयमेवकाल: सर्वग्रहकालेभ्य: परमाल्प:। रवेराभिमुख्ये गुरुरधिकतम प्रकाश: । ग्रहाणां सर्वेषां मध्ये शुक्रं विना गुरुरेवाधिक प्रकाश: । दूरदर्शनेन दृष्टे गुरौ ग्रह पृष्ठे नाशमनुसृत्य वर्णभेदो गम्यते । नाडीवृत्तस्योभय पार्श्वयोर्दशभाग पर्यन्तं देशो धिक प्रकाश: । तत: परमुभयपार्श्वयो ध्रुव मण्डल पर्यन्तं गोधूमवर्णदेशो दृश्यते । ध्रुवमण्डले नीलवर्णो भवत: । गुरोर्वातावरणं सान्द्रं विद्यते । किन्तु वर्णपट परीक्षायां तत्र 'मिथेन' वायु: अमोनिया वायुश्च विद्यत इति गम्यते । गुरोरेकादशोपग्रहा: सन्ति । तत्र चत्वारो ल्पीयसामपि दूरदर्शनेन दृश्यन्ते । इमे 'गैलेलियो' नामकेन शास्त्रज्ञेन पूर्वमेवज्ञाता: । तेषां कक्षाश्चैषाक्षेषाभ्येण वृत्तान्येव भवन्ति । तत्र प्रथम द्वितीयौ चन्द्रात् किंचिदल्पौ । तृतीय चतुर्थौ तु चन्द्रादधिकौ भवत: । इमावेव सौरकुटुम्बे महान्तावुपग्रहौ । तेषां चतुर्णां व्यासा: क्रमेण २१०६, १८६५, ३२७३, ३१४२ मैलीमिता: । अयं पंचम: प्रतिपलं सप्तमैलीमितवेगेन भ्रमति । अयमेव सौरकुटुम्बीय ज्योतिषां सर्वेषामपि क्षेपिष्ठो भवति । पंचानां मध्ये चतुर्थं विना शिष्टाश्चत्वारो पि प्रतिभ्रमणग्रस्ता भवन्ति । तत्र कारणं च तदीय विक्षेप वृत्तानां गुरु विक्षेप तुल्यत्वम् । तेषां ग्रहण पुरस्कृत्यैव प्राग्मस्माभी रविदूरं गणितम् । ते रवि योगकाले गुरावात्मच्छायां प्रसारयन्ति । ततश्च गुरु पृष्ठे पदे पदे पि रवि ग्रहणं भवति । इमाश्छाया अपि दूरदर्शने चलन्त्यो दृश्यन्ते । शिष्टाश्चत्वार उपग्रहा: प्रकृष्टदूरदर्शनेनैव दृश्यन्ते । तेषां कक्षाश्चाति दीर्घ वृत्तानि । अष्टमो नवमश्चैव प्राच्या: प्रतीचीं गच्छत: । दशमैकादश तमश्च १९३१ ख्रीस्ताब्द एवाविष्कृतौ ।

शुक्र: :

शुक्रो हि कालपुरुषस्यात्मको मन्त्री, गौर शरीर:, स्त्रीलिंगश्चेन्द्राणी,

दैवताको, जलतत्वो, ब्राह्मण:, रज: प्रकृतिक:, सुखी, कान्तवपु:, श्रेष्ठ:, सुलोचन:, काव्यकर्ता, कफ-वात् प्रकृतिक:, वक्रकेश:, शरीरे शुक्रस्वामी, शयन-स्थानाधिप:, समये पक्षात्मको म्लेच्छ उत्तरदिशि दिने च बलवान्, पुष्पवृक्षोत्पादक:, क्षौमवस्त्र:, वसन्त ऋतुस्वामी, मूलसंज्ञक:, वृषतुलाधिप:, मीनराशौ, सप्तविंशति संख्यकांशान्तमुच्च:, कन्यायां सप्तविंशत्यंशान्तं नीच:, तुलायां पंचदशांशान्तं मूलत्रिकोण: । कलप्रकामुक सुख, गीतशास्त्र, काव्य, पुष्प, सुकुमार यौवनाभरण रजत यान, गर्वलोक, मौक्तिक विभवक वितारस विवाहादीनां वस्तूनां कारक: । शनि बुधौ चास्यमित्रे गुरु भौमौ समौ रविचन्द्रौ शत्रु स्त: । अयं हि पंचविंशे वर्षे भाग्योदयप्रदो भवति । भगवान परशुरामो अस्यावतार: ।

बुध इव शुक्रो पि रवि समीपवर्ती ग्रह: । तथा चौदयिक नक्षत्रत्वेन सायमिक नक्षत्रत्वेन च दृश्यते । न कदाप्यर्द्धरात्रौ दृश्यत इत्यर्थ: । तस्य रवेश्च मध्ये दूरस्य परम प्रमाणं ४८$^{0}$ भागमितम् । ग्रहाणां मध्ये शुक्र एवाधिकतमप्रकाश: । तस्य च परम प्रकाश: समीपयोग कालात् षाट्त्रिंशद्दिनै: पूर्वं परं वा भवति । तथा च तस्य व्यर्क ग्रह दूरं ३९$^{0}$ । प्रकाशमाने पि रवौ शुक्रौ दृग्गोचरो भवति । तस्य रविं परितो भगणाकाल: २२४ दिनानि । रवि योगकाल: ५८४ दिनानि । तस्यात्म प्रदक्षिण कालो पि भगण काल तुल्य इति मन्यते । किन्त्विदं न सिद्धान्तितम् । यदि रविकर्णो रूपतुल्यस्तदा शुक्रकर्ण: ०७२३ भवति । तस्य केन्द्र-च्युतिरित्यल्पा ००६८ मिता । तस्य परम विक्षेप: ३$^{0}$.२०$'$। तस्य गोलीय व्यास: ७५८० मैल्य: । अत शुक्रो भूमे: किंचिदेवाल्पीयान् । तस्य भूमेरिव सान्द्र वातावरणं विद्यते । किन्तु तत्र प्राणवायुवो म्बुघ्नो पि च न स्यादिवगम्यते ।

शनैश्चर ग्रह: :

अयं हि कालपुरुषस्य, दु:खस्वरूप:, कृष्णवर्ण:, ब्रह्मदेवताक:, पुरुषनपुंसक:, मृत्यु: अर्थात् –

"व्याधा रोग भयं लज्जा रोग: शोकस्तथैव च ।
मरणं चापमानं च मृत्युरष्टविध: स्मृत: ।।"

वायुतत्व:, शूद्र:, स्थूलदन्तो लस:, पंगु:, रोमकच: कृशो दीर्घतनु:, पिंगलनेत्र:, वात प्रकृतिक:, शरीरे स्नायुस्वामी, उत्कर वल्मीक स्थानाधिपति:, सम्ये वर्षप:, कषायरस:, पश्चिमे रात्रौ च बलवान्, कुत्सितवृत्तोत्पादक:, चित्रपट्टवस्त्र:, शिशिरऋतुस्वामी, मूलधातुसंज्ञक:, सर्वग्रहेषु वृद्धस्तथायुवृद्धि प्रदायक:, मकर-कुम्भाधिपति:, तुलाराशौ विंशत्यंशान्त मुच्चस्तथा, मेषे विंशत्यंशान्तनीच: । कुम्भे च विंशत्यंश पर्यन्तं मूलत्रिकोण:, तम: स्वभावो, महिष, हय, गज, तैलवस्त्र, श्रृंगार, प्रमाण सर्वराज्यादवायुध, गृह युद्ध संचार, शूद्रनीलमणि विध्वकेश:, शल्यशूल रोग, दासदासी, जनायुष्टा आकस्मिक मृत्यु प्रभृतिकानां, वस्तूनां कारक:, षट्त्रिंशत्मे वर्षे भाग्यप्रदो भवति । शुक्र-बुधौ-चाज्यमित्रे, गुरु: समो, रवि-चन्द्र-भौमा: शत्रव: सन्ति । भगवान् कूर्मो स्यावतार: प्रोक्त: । अस्य नामैव मन्दं चरतीव दृश्यत इति निर्दिशति, यतो स्य भगणकाल: २९.५ वर्षाणि, अस्य कर्ण: ९-५३९, परमविक्षेपश्च सार्द्धद्विभाग: । केन्द्रच्युति: .०५६, अतोस्य कक्षा ईषद्वैषम्येण वृत्तमेव भवति । अस्य रवियोगकाल: ३७८ दिनानि । गुरोरनन्तारमयं पृथुग्रह: । किन्तु तदीयसान्द्रतात्पतमा.७ भवति । हरित वर्णेन सुप्रकाशो यं दृश्यते । अस्य वातावरणं गुरोरिव

भवति । अस्य गोलस्य विषये किंचिदाश्चर्यं जनकम् । दूरदर्शनेन दृश्ये गोलं परितो नाडीवृत्ताले तिस्रो रशनाश्च भवन्ति । तासां मध्ये मध्यमा विशेषं प्रकाशते । इमा वर्तुला एव विद्यन्ते । किन्तु तिरश्चीनतया दृश्यमाना दीर्घ वृत्तानीव भवन्ति । बाह्यरशनाया व्यास: १७१००० मैलीमित: । तस्या आयामाश्च १०००० मैलीमित: । मध्याया आयाम: १६००० मैलीमित:, आन्तरस्य ११५०० मैलीमित:, इमा रशना नहि परस्परं मिलिता: । मध्ये तासां शून्य प्रदेशो वर्तते । तस्यां सान्द्रता दशमैलीमिता। चा: सन्दर्भमनुस्मृत्यै तादृग्विधा दृश्यन्ते । कदाचिद् रविणाल्प प्रकाशितभागे स्माकम-भिमुखे भवति तदा ता न दृश्यन्ते । यदा तासां तले भूमिरायाति तदा तासां कोटिरेव रेखावत्प्रकाशिता भवति । किंचग्रहो वृषभ-मिथुनयोर्यदा भवति तासां यावदायामो पि दृश्यो भवति, तदा विपातग्रहो नवति भागात्मक: स्थात् । प्रथमा इमा रशना: कथमेवम्भूता इत्याशंकायां ता अत्यल्पखण्डैरप्रकाशमानैस्तथा वर्तुलकारस्थैर्ग्रहै: परिवेष्टिता इत्यवगम्यते । ते कस्यचिद् ग्रहस्य जायमानस्य ग्रहसीमां प्रविष्टस्य कोटिशो भिद्यमानस्य खण्डा इति शास्त्रज्ञानामभिप्राय: । अथेमा रशना विहाय शनैश्चर ग्रहस्य नवोपग्रहस्य विद्यन्ते । ते सर्वे पि दूरदर्शन साहाय्येनैव दृष्टुं योग्या: ।

## राहु ग्रह: :

भगवान् वराहोऽस्यावतार: । सेनास्वरूप:, धूम्राकारो नीलशरीरो, वनचारी, भयंकरो, वातप्रकृतिको, धीमान्, चाण्डालजातिक:, वल्मीक-स्थानाधिप:, सीसधातुप:, चित्रकन्थ:, समये चाष्टमासाधिप:, धातुसंज्ञक:, प्रयास समय सर्परात्रि-सकल सुप्तार्थं ज्ञकारक: । मिथुने विंशत्यंशान्तमुच्च: कुम्भेमूलत्रिकोणश्च प्रोक्त: । अस्य गृहं कन्याराशिर्ज्ञेय: । अस्य शनि शुक्रौ मित्रे सूर्य चन्द्रभौमा: शत्रव: प्रोक्ता:।

क्रान्तिवृत्तस्य चन्द्रविक्षेपवृत्तस्य सम्पात् बिन्दु राहुकेतु १.८६ संवत्सरेषु पश्चात् भ्रमतो नक्षत्रचक्रे 'रविराहु समयोग कालः' इत्युक्ते रविराहु भोगकालात् पुनः रविराहुयोगकाल पर्यन्तं मध्यवर्तिकालः ३४६३ दिनानि भवति । अयं कालो ग्रहणाधिकार उपयुज्यते । चन्द्रो भूमिं परितो दीर्घ वृत्ते भ्रमति । भूमिस्तस्य नाभौ विद्यते । इदं दीर्घवृत्तं नहि स्थिरम् । किन्तु तस्य दीर्घ व्यासो नक्षत्रेषु पुरतो गच्छति, गतिश्च चन्द्रकक्षातल एव भवति । तस्य भ्रमणकालश्च ३२३२.५७५ दिनानि । ईषादवर्षाण्यैण नववर्षमितानि । एतादृशी दीर्घव्यास गतिं भूकम्पादि ग्रहाणां सर्वेषामपि दीर्घ वृत्तानि अनुभवन्ति । किन्तु तत्र गतिरत्यल्पा । भूदीर्घ वृत्तस्य वृत्तिय दीर्घ व्यास भ्रमणकालः १०८००० वर्षमितः । अथ चन्द्र दीर्घवृत्तीय दीर्घव्यास भ्रमणकाल इत्युक्ते सूक्ष्मतया मन्दोच्च भ्रमणकालः, असौकालः, प्राचीनाचार्यैरपि तावानेव दत्तः । कथं तैर्ज्ञात इत्यत्र भास्करस्योपपत्तिं प्रदर्शयामः । प्रतिदिनं चन्द्र वेधं कृत्वा स्फुटगतयो विलोक्याः । यस्मिन् दिने गतेः परमाल्पत्वं दृष्टम् । तद् दिन मध्यम एव स्फुटचन्द्रो भवति । तदेवोच्चस्थानम् । यत्रोच्चसमे ग्रहे मंदफलाभावो गतेश्च परमाल्पत्वम् । ततश्च तस्माद् दिनादारभ्यान्यस्मिंश्चन्द्र पर्यये प्रत्यहं चन्द्र-वेधात् तथैवोच्च स्थानं ज्ञेयम् । तच्च पूर्वस्थानगतं एव भवति । यच्चोरनन्तरं तद् ज्ञात्वा नुपातः क्रियते । सम्प्रतीदमुच्चस्थानं बिम्बप्रमाण वेधोनाधिक्रियते तत्र वेध क्रियायां विकलावयव पर्यन्तमपि सूक्ष्मता सम्पादक यन्त्राणां सद्भावात् । यस्मिन् दिने बिम्बस्य परमाल्पत्वं तदा स उच्चे तिष्ठतीति । उच्चस्य दूरतम् बिन्दुत्वात् बिम्बस्य परमाल्पत्वम् । चन्द्रस्य कक्षा या भवति साकाशे विक्षेप वृत्तिया दृश्यते । तद्वृत्तं क्रान्ति वृत्तस्य तिरश्चीनम् । तत्र परम विक्षेपः ४°५९'-३०" प्रारम्भ ५°१८'-३०" पर्यन्तं चलन्नास्ते । ततश्च चन्द्र दीर्घ वृत्तीय कैन्द्रच्युतिश्च न समा । चन्द्रस्य भगणकाले पि विकारः सम्पद्यते । राहु केतु गतिश्च न समा । एतैः कारणैः

चन्द्रस्य स्फुटीकरणं नवीन सिद्धान्तो बहु क्लेशं ददाति । भुवं परितो भ्राम्यन्तं चन्द्रं रविर्विकर्षति अयं विकर्षेति परिभाषामहे । अनेन विकर्षेण चन्द्रे चत्वारः संस्कारा उत्पद्यन्ते । तेषां नामानि 'वेरियेषन्' 'इवेक्शन्' 'एन्युअल' इक्वेक्शन् पारेलाक्टिक' इनीक्वालिटी इति ।१९८१ तमे ख्रीष्टाब्दे मार्च मासस्य त्रयोदश तमे दिनांके (आंग्ल) अंग्रेज खगोल शास्त्रिभिः विलियम हर्षल महाभागैः 'युरेनस' नामकस्य नवीनतम ग्रहस्य अन्वेषणाम् कृतम् । तदन्वेषास्य ६५ वर्षेभ्यः पश्चात् १८४६ तमे ख्रीष्टाब्दे सैप्टम्बर मासस्य २३ तमे दिनांके पयूटोग्रहस्यान्वेषणम् जर्मन वैज्ञानिक श्रीमन्तो प्लूटो महोदयेन कृतम् । नेप्च्यून ग्रहस्योपरान्ते अन्वेष्यमनीयं प्लूटोनाम्नेति प्रसिद्धं नीतो । क्लाइड विलियम टोम्बोह नामकैः अमेरिकन वैज्ञानिकैः पंचपचाशत (५५) वर्षेभ्यः प्राक् फैब्रुअरी मासस्य ११३० तमे ख्रीष्टाब्देस्य १८तमे दिनांके सूर्यमण्डलात् अति दूरस्य स्थितिस्य अस्य ग्रहस्य संसोधनं कृतम् ।

युरोप प्रदेशस्य खगोलवेत्ता विलियम हर्शल नामकस्य विद्वानस्य क्रियमाणं प्रथमतया नवीन संशोधनस्य कारणात् अस्य ग्रहस्य युरेनस अथवा प्रजापति नामाभिधानेना पि प्रसिद्धिमवाप्तम् ।

नेप्टयुन, वृहत्पाराशर्याम् तथा च जैमिनि सूत्रे हर्षल, प्लूटो आदि नवीनतम ग्रहस्य वर्णनं नास्ति एतद् असत्य आधार विहीनमेव । भारतीये ज्योतिषे एव सर्वप्रथमं ग्रहाणां अप्रकाशित ग्रहाणामपि विवेचन प्राप्यते । अप्रकाशित ग्रहाणां विवेचने विश्लेषणे एतत्तु स्पष्टमेव ज्ञायते सूर्यादुपरि भागे अन्तरिक्षे पि अनेकाः ग्रहाः सन्ति तेषां प्रकाशः अन न दृश्यते । बहुविध यत्नेन सूक्ष्म निरीक्षण यन्त्रादि साहाय्येन तेषां अप्रकाशित ग्रहाणां रहस्योद्घाटनं भवति । भारतीय

ज्योतिष शास्त्रस्य ग्रन्थे धूम, व्यतिपात, इन्द्रचाप गुलिकादीनां गणनं दृश्यते । गुलिकस्य जैमिनीय सूत्रे पि सर्वत्र निर्देश: नायं शुभ ग्रह । अन्यत्रापि फलकथन प्रकारे गुलिक योगेन ग्रहाणां शुभाशुभ योगो भवति स गुलिके विषदो विषाहतो वा

जैमिन सूत्राग १।२।२९ रमण प० बंगलौर

जन्मकालीय सूर्यस्पष्टराश्यंशादिके राश्य चतुष्टयस्यांशानां त्रयोदशस्य विंशति कलानां च योगे धूमनामकस्या प्रकाशक ग्रहस्य स्पष्टो भवति । द्वादशराशितो न्यूनो धूम एव व्यतिपातो भवति । अस्यैवापरं नाम पात इति ज्ञेयम् । परिवेषमाह अस्यैवापरं नाम परिधिरिति ज्ञेयम् । इन्द्रचाप स्फुट प्रकारमाह अस्यैवापरं नाम चाप इति कथ्यते । ध्वजमाह अस्यैवापरं नाम केतुमिति इति कथ्यते ।

हर्षलि लग्नस्थे जातको सर्वं साधारणा: विचित्र: हठी दुराचारी निर्दयी क्रूर: क्रोधी च भवति ।

द्वितीयस्थे रोगी, धनी, हीनांगी राज्यापहृत मानसो मन्दबुद्धि नपुंसकश्च प्रोक्त: ।

तृतीयस्थे बुद्धिमान, शूर: प्रियम्वद: गुप्त विद्या प्रिये भवति । इति

---

अर्वाचीन युगे आधुनिक दृष्ट्या अवकाश- कार्यक्रमस्य सीमाचिन्हरूपा: कृत्रिमा: उपग्रहा: अणु-परमाणु ज्ञान-विज्ञान समस्त ब्रह्माण्ड दर्शन-परीक्षण निरीक्षणादि समस्त लोक कल्याणार्थं विश्व सर्वकारै: अवकाशे प्रेषिता: । एतेषु केषांचित् उपग्रहाणां नामानि प्राचीन खगोलशास्त्रविदानां आर्यभट्ट - भास्कराचार्यादिनां स्मृतिरूपेण गृहितानि वर्तन्ते ।

## अवकाश कार्यक्रमस्य सीमाचिन्हम् अमर्यादिलमेव ।

| उपग्रह। रॉकेट | वर्ष | प्रस्थान स्थानम्(कॉस्मोड्रोम) |
|---|---|---|
| आर्यभट्ट: । | १९७५ | सोवियेत रॉकेट द्वारा प्रस्थान |
| भास्कर: । (प्रायोगिक दूरदर्शन संवेदन उपग्रह:।) | १९७९ | ,, ,, |
| एस एल वी- ३ (प्रथम भारतीय रॉकेट प्रायोगिकी स्वदेशी उपग्रह आरएस-१ रोहिणी प्रस्थान । | १९८० | श्री हरि कोटा स्थातोषु प्रस्थान । |
| भारतीय भूस्वातिक संदेश उपग्रह-अपेल । | १९८१ | फ्रेन्च गुयाना अ कौर स्थानेषु प्रस्थान । |
| भास्कर -२ (प्रायोगिक दूरसंवेदन उपग्रह:) | १९८१ | सोवियेत कास्मोड्रोम स्थानेषु प्रस्थानम्। |

| उपग्रह।राकेट | वर्ष | प्रस्थान स्थानम्(कौस्मोड्रोम) |
|---|---|---|
| विकास उपग्रह रौहिणी(आरएसडी-१) | १९८१ | श्री हरिकोटा खातेषु प्रस्थानम् । |
| इनसेट १-अ( ) (अमेरिका(भारतीय पद्धत्यानुसार) द्वारा निर्मित द्वितीय विकास उपग्रह रौहिणी | १९८२ | अमेरिका कैप कैनेवेरल स्थानेषु प्रस्थानम् । |
| (आर एस डी-२) द्वितीय उपग्रह | १९८३ | श्री हरिकोटा स्थानेषु प्रदक्षिणापथे प्रस्थानम् । |
| इनसेट-१ + ब( ) भारतीय पद्धत्यानुसारेण - अमेरिका द्वारा निर्मित । | १९८३ | अमेरिका कैप कैनेवेल स्थानेषु प्रदक्षिणा प्रस्थानम् । |
| प्रथम भारतीय अवकाशयात्री अवकाश-मार्गं गतः । | १९८४ | सोवियेत अवकाशयान सोयुल-टी |
| भारतीय दूरसंवेदन उपग्रहः । आई आर एस-ए-१ | १९८८ | सोवियेत संघ बैकोनुर स्थानेषु प्रस्थानम् । |
| पायोनियर-१०, दशमो उपग्रहः । | १९८८ | कैलिफोर्निया `नासा` अमेरिका । |

## सूर्यमण्डले नूतनस्य ग्रहद्वयस्य संकेतः ।

रशिया देशस्य खगोलशास्त्रविदाः मन्यन्ते यत् वर्तमान वैज्ञानिक मान्यतानुसारेण "प्लुटो" इति ग्रहः सूर्यमण्डले अंतिमग्रहत्वेन उल्लेखितः किन्तु अस्या मान्यतायाः पादपूर्तिरूपेण अभूतपूर्वं संशोधनेन ज्ञायते यत् सूर्यमण्डले "प्लुटो" इति ग्रहानन्तरमपि अन्यौ द्वौ ग्रहौ अपि वर्तेते ।

एक ग्रहः + -१ इति नामांकितः ० ।सः पृथ्वेः अपेक्षाया ४०० परिमितः सुदीर्घः इत्यनुमीयते ।

आश्चर्यं यत् असौ ग्रहः सूर्यस्य प्रदक्षिणां करोति किन्तु तस्य परिक्रमणस्य दिशा पृथ्वेः अपेक्षाया व्युत्क्रमा वर्तते । असौ ग्रहः पृथ्वेः पृथ्वेः भ्रमणकक्षायाः १४३$^{0}$ ------ भ्रमणकक्षायां भ्रमति ।

अपरस्तु ग्रहः + -२ पृथ्वे अपेक्षाया २४० परिमितः सुदीर्घः वर्तते । असौ ग्रहः पृथ्वेः सम्पनायां भ्रमणकक्षायां ६०$^{0}$ ------- सह पृथ्वेः भ्रमणदिशायामेव भ्रमति।

+ -१ तथा च +-२ इति ग्रहद्वयं प्लुटो एवं सदृशमेव सूर्यात् ५.६ अर्बुद कि०मि० दूरे वर्तते ।

+ -१ तथा च + -२ इति ग्रहयोः अस्तित्वस्य प्रामाण्यं

## प्रस्तावना

सन्दर्भ-सूची :

१- श्रीमद् भागवत, गीताप्रेस, गोरखपुर १।४
२- श्री मार्कण्डेय पुराण-१
३- हीस्ट्री आफ संस्कृत लिटरेचर-श्री के०ए० नीलकण्ठशास्त्री, पृ०सं० ५६१
४- संस्कृत साहित्यैतिहासः- श्री बलदेव उपाध्याय, पृ०सं० ३६२
५- कृष्णायजुर्वेदीय संहिता- सायण भाष्य ।
६- ऋग्वेदभाष्यभूमिका- स्वामी दयानन्द ।
७- मनुस्मृतिः अ ।
८- ऋग्वेद १०।१५।८, यजुर्वेद १६।५६
९- ऋग्वेद ६।६६।११, यजुर्वेद १६।५३
१०- बृहत्संहिता ।
११- अ- वेदकाल निर्णयः-दीनानाथ शास्त्री चुलैट ।
१२- मनुस्मृतिः अ ।
१३- शतपथ ब्राह्मण २।१।२
१४- ऋग्वेद : ६।३३।६
१५- ऋग्वेदः ७।६५।२
१६- ऋग्वेदः १०।६०।१२
१७- मुण्डकोपनिषद् १।१५
१८- काव्यमीमांसा पृ० सं० ।
१९- पाणिनीय शिक्षा ४१-४२
२०- आर्य ज्योतिषम् श्लोक सं० ६३
२१- बृहत्संहिता भूमिका
२२- तत्रैव ।
२३- तत्रैव १-९
२४- लीलावती-श्री भास्कराचार्य अ-१ श्लोक २। गणिततिलकम्-श्रीपति १।२-३
२५- यजुर्वेद ।

२६- यजुर्वेद: १८।२४-२५

२७- तत्रैव २३।६२

२८- तत्रैव २४।२०

२९- तैत्तीरीय आरण्यकम् २।६

३०- शाबरभाष्यम् २।१।८

३१- पाणिनि मुनिना 'छंदो ब्राह्मणानि तद्विषयाणि' (अ४।२।६६)
इति सूत्रमता सुतरां छंदो ब्राह्मणयोरैकात्म्यं खण्डितम् ।एवं विचारतर्काः ब्राह्मणा-
मवेदत्वं स्वीकुर्वतामुल्लसन्ति ।

३२- कठोपनिषद् १।२।१२

३३- तत्रैव १।३।१५

३४- मुण्डकोपनिषद् ३।२।६

३५- तैत्तरीयोपनिषद् ब।१।

३६- ईशावास्योपनिषद्-२

३७- विष्णुपुराणम् १।३, ७।२७

३८- ऋग्वेद: सं० १।१०३।४

३९- तत्रैव १७। ७२।२

४०- तत्रैव १०।९७।१

४१- वाजसनेयि संहिता १२।७५

४२- ऋग्वेद: १०।१०

४३- तत्रैव ७।७०,४।४,१०।७२।१

४४- तैत्तिरीय संहिता-४।३,३।१-२

४५- तत्रैव कृतादिशब्दानामुल्लेखो दृश्यते ।

४६- वाजसनेयि संहिता ३।१८

४७- ऐतरेय ब्राह्मणम्- ३३।१५

४८- भा०ज्यो०शा० इतिहास-श्री शंकर बा०दीक्षित पृ० सं० ३७

४९- ऋग्वेद:सं० ७।१०३, ७।६

५०- वाजसनेयि संहिता २७।४५, ३०।१५

५१- तैत्तिरीय ब्राह्मण, १।४, १०।१
५२- श्रौतसूत्रं निदानसूत्रं- ५।११
५३- सूर्यसिद्धान्तः अ-१, श्लोक-५५
५४- श्रौतसूत्रं निदानसूत्रं-५।११
५५- तैत्तिरीय संहिता ७।५, ६।१
५६- लाट्यायन श्रौतसूत्रम् ४।८।७
५७- निदान श्रौतसूत्र ५।१२
५८- शतपथ ब्राह्मणम् २।१, ३।१
५९- तैत्तिरीय संहिता ७।४, ८।२
६०- शतपथ ब्राह्मण २।१, ३।१।३
६१- भा०ज्यो०इति० श्रीयुत् शं० बा० दीक्षित पृ० सं० ४७
६२- शतपथ ब्राह्मणम् २।१, ३।१
६३- तैत्तिरीय ब्राह्मण २।७, १०।२
६४- तैत्तिरीय ब्राह्मण १।१
६५- तैत्तिरीय संहिता ५।६, ७।१
६६- तत्रैव १।४, १४।१
६७- तत्रैव ७।५,६।१
६८- तैत्तिरीय ब्राह्मण २।२, ३।१
६९- तत्रैव ३।१०, १।१।३७
७०- शतपथ ब्राह्मण ११।३, २।५
७१- तत्रैव ४।६, ५।१
७२- ऋग्वेद संहिता १०।५५।३
७३- तैत्तिरीय ब्राह्मण १।२, ५।२।६
७४- अथर्ववेदः १९।९।७
७५- ऋग्वेद संहिता- ४।५०।४
७६- शतपथ ब्राह्मण -४।२,१।१
७७- अथर्ववेदः-१७।७, ७।१०
७८- तैत्तिरीय संहिता -४।४।१०

७६- तैत्तिरीय ब्राह्मणम्-१।५, १।४

८०- तत्रैव, ३।१, १।२, ३।१, ४।५

८१- शतपथ ब्राह्मणम् १०।५, ४।५

८२- अथर्ववेदः-१६।३५।७, १।५, ८।२

८३- तैत्तिरीय ब्राह्मणम् १।५, २।२

८४- मैत्रायणी संहिता २।१३।२०

८५- तैत्तिरीय संहिता ४।४, १०।१।३

८६- तैत्तिरीय ब्राह्मणम् ३।१, ४।१

८७- शतपथ ब्राह्मणम् २।१, २।४

८८- महाभारते वनपर्व-अध्याय १४६, १८८, २२, २८, शांतिपर्व अ-२३२-३३ ।

८९- महाभारतम् आ-पर्व-१२४-२२ ।

९०- महाभारते विराटपर्वणि ५२।३।४

९१- तत्रैव ५२।१।२

९२- महाभारते अनुशासन पर्वणि ६४ ।

९३- महाभारते शांतिपर्वणि ३०।१, ४६।४७

९४- मनुस्मृतिः-१।६८-८६ ।

९५- व्यासस्मृतिः- १।१४, १५।१८

९६- याज्ञवल्क्यस्मृतौ आचाराध्याय-२१७ ।

९७- तत्रैव - २९५ ।

९८- नारदपुराणे अध्याय ५४-५६

९९- आग्नेयपुराणे अध्याय १२०

१००- श्रीमद् भागवते ३।११, १।८

१०१- ब्रह्माण्ड पुराणे १।७, २६।२१

१०२- श्रीमद् भागवत ३।११।६
१०३- ब्रह्मवैवर्त पुराण - १।५४।२६-२८
१०४- विष्णु पुराणे - २-८, ५।८
१०५- नारद पुराणे- १।५४।२
१०६- पाणिनीय अष्टाध्यायी- ३।१।१४३
१०७- सिद्धान्त कौमुदी-वासुदेव शर्मा, निर्णयसागर प्रेस- मुंबई।

१०७- शतपथ ब्राह्मणम्- १०।१।१।५ ।
हंसराज: वैदिक कोष: पृ० १५७
दयानंद महाविद्यालय संस्कृत ग्रन्थमाला- लाहौर ।
१०८- बृहत्पाराशरी ३।४ काशी संस्कृत सिरीज ।
१०९- शतपथ ब्राह्मणम्- ४।६।५।१
हंसराज: वैदिक कोष: पृ० ६०३
दयानन्द महाविद्यालय संस्कृत ग्रंथमाला- लाहौर ।

--------